70. अत्र ममन्थुरमृतौजस इत्यनन्तरं हालाहलोत्पत्त्यादिप्रतिपादकं पुराणान्तरस्थमत्र प्रक्षिप्यान्यस्तद् व्याचकार । नास्माभिः प्राचीनशुद्धपुस्तकेषु ते श्लोकाः दृश्यन्ते ।
-C K (Comentary of Kataka)
p. 255. R. 1.44.17.

M and the another pattern common to Vi, P(s), and Br. Unlike the Mbh and R, there are no critical editions available of M., Vi, P(s) and Br, and hence it can not be ascertained which passages in these Purāṇic texts are genuine or interpolated. But from the similarity of patterns discoverable in the tabular statement, it may be conjectured that in the matter of the emergence of entities and their sequence, M in some of its earlier parts may be indebted to the Mbh, while P(s) and Br may be indebted to Vi.

(iv) It will be found from the tabular statement given above that the Purāṇas M, Br, P(u), and SK increase between them the number of entities to 24 by adding 12 more entities to the standard 12 of frequent occurrence. Of these additional 12 entities two are Chatra (umbrella) and Kuṇḍale (ear-pendants), insignia of nobility or royalty or royal splendour; eight are plants and trees dear to some divinities and hence considered sacred; while two i. e. Kalipriyā and Vainateya-bhāryā appear to be popular mother goddess. It appears that the additions were made by the respective Purāṇas according to their predilection for Viṣṇu, Śiva or some mother goddess.

(v) The first R entities according to the table are of frequent occurrence and may be said to constitute the standard or normal number of entities which emerged out of the ocean. There is one Sanskrit Stanza[71] which appears to have been popular, as it has been included by popular tradition among the benedictory verses sung on the occasion of marriage ceremony to invoke benediction on the couple to be married. The source of the stanza is not known. In that stanza, the fourteen 'jewels' which emerged out of the ocean are invoked to bestow benediction on the bride and the bridegroom. These fourteen 'jewels' include the first twelve entities referred to above as the standard or normal number occurring frequently in the Purāṇas. The remaining two out of the fourteen 'jewels' are the bow of Hari (the Śārnga bow) and

71. लक्ष्मीः कौस्तुभपारिजातकसुरा धन्वन्तरिश्चन्द्रमाः
गावः कामदुघा सुरेश्वरगजो रम्भादिदेवाङ्गना. ।
अश्वः सप्तमुखो विषं हरिधनुः शङ्खोऽमृतं चाम्बुधेः
रत्नानीह चतुर्दश प्रतिदिनं कुर्वन्तु वो मङ्गलम् ॥

Śaṅkha (conch). It is remarkable that none of these two occurs among the entities in the Epic and Purāṇic works studied in this article.

(vi) The legend of the churning of the ocean shows in its different versions the impact of different religious sects and systems. It is mainly dominated by the Vaiṣṇavite element. It is Viṣṇu who becomes the beneficiary of the two entities—Śrī and Kaustubha. It is Viṣṇu again who rescues the gods out of their difficulties and makes them the sole beneficiaries of ambrosia. This sway of the Vaiṣṇavite element is complete until the stage in the development of the legend is reached when the entity of 'Poison' appears on the scene.

With the emergence of 'Poison' Kālakūṭa, the Śaivite element enters into the legend and claims a place of honour along with the Vaiṣṇavite. It is Śiva who saves the gods from disaster by himself drinking the poison. Even under this development of the legend viz. the introduction of 'poison' as an entity into the story, there appears a stage or a phase when the Śaivite element has not yet entered into the legend. For instance, the Vi, Br and P(u) state that it was the Nāgas which took over the poison. But in the rest of the texts which refer to the emergence of poison, it is Śiva who gains a place of honour. But it is worth noting that in these passages, the Vaiṣṇavite and Śaivite elements do not come into conflict. Śiva and Viṣṇu appear to work in harmony, one bowing to the other and vice versa. In M Viṣṇu requests Śiva. In Bhāg the gods request Śiva to save them from the ill effects of poison. In P(u), Śiva has respect for Viṣṇu and recites the latter's names before drinking poison. In SK, Śiva insists that Gaṇeśa should be respected by the gods. In P(s) Brahmadeva asks the gods to worship both Viṣṇu and Śiva.

Some Purāṇic texts evince the impact of the worship of Devī or Mother Goddess. In Vi and P(u) at the conclusion of the churning of the ocean, gods pray to Lakṣmī for her eternal grace and beseech her never to desert them. In the Br, it is said that the Goddess Lalitā, who was in reality not separate from

Viṣṇu, was propitiated by Viṣṇu and was requested by him to intervene in the quarrel between the gods and the demons and distribute ambrosia among the gods. Lakṣmī and Lalitā represent the beneficent aspect of the Mother Goddess. In Purī, the dreadful aspect of the Mother Goddess is implied when it is said that the Goddess Kalipriyā (the beloved of Kali), the inauspicious deity emerging out of the ocean, wearing red garlands and garments should visit the house of quarrelsome people.

नारदपुराणान्तर्गतानि विशिष्टधर्मशास्त्रवचनानि

अनन्तशास्त्री फडके

[The Purāṇas extensively contain *Dharmaśāstra* material which is quoted in the later *nibandha* texts. Here in this article, the learned author has compiled such maxims from the Bṛhannāradīya Purāṇa which are generally not found quoted in the Digests on the *Dharmaśāstra*. In these verses of the Bṛhannāradīya-Purāṇa certain rites are recommended to be performed and injunctions are made for the performance of certain deeds. Expiatory rites have been also recommended for those deeds which are done against the injunctions of the *Dharmaśāstra*. Here in these verses we meet with certain rites and rules of conduct which do not conform with those mentioned in the Digests. In such cases the writer has tried to reconcile the both. He has also commented upon those verses whose meaning is doubtful or obscure.]

नारदपुराणे धर्मशास्त्राणां प्रसिद्धा अंशा उपलभ्यन्ते तथा केचनाऽतिप्रसिद्धा अपि अंशा विद्यन्ते, ये प्रायः संप्रति विद्यमानेषु स्मृत्यादिग्रन्थेषु नोपलभ्यन्ते। एतेषामेव संग्रहोऽत्र लेखे कृतः, वचनानां क्रमोऽध्यायक्रममनुसृत्यैव स्थापितः, न तु समानविषयमनुसृत्येति।

१. पूर्वमीमांसापद्धत्या धर्मशास्त्रविचारकाः प्रायः पुराणविषयेषु केषुचिदर्थवादत्वं कल्पयन्ति, तत्कल्पनं महतेऽश्रेयसे कल्पते, तथाहि—

पुराणेष्वर्थवादत्वं ये वदन्ति नराधमाः।
तैरर्जितानि पुण्यानि क्षयं यान्ति द्विजोत्तमाः॥
समस्तकर्मनिर्मूलसाधनानि नराधमः।
पुराणान्यर्थवादेन ब्रुवन्नरकमश्नुते॥

२. सद्धर्मवक्तुश्चरणसंस्पृष्टां गङ्गोद्भवां तुलस्या मूलस्थितां च मृत्तिकां शिरसि धारणेन विष्णुपदप्राप्तिः—

सद्धर्मवक्तुः पदसंभवां मृदं गङ्गोद्भवां चैव तथा तुलस्याः ।
मूलोद्भवां भक्तियुतो मनुष्यो धृत्वा शिरस्येति पदं च विष्णोः ॥ पू. ६ २२

अत्र एतीति लेटः प्रयोगस्तेन विधिः संभवति एवं सर्वत्र ।

३. गंगायाः स्मरणे पापनाशः, दर्शने हरिलोकप्राप्तिः पाने सारूप्यमुक्तिलाभः—

अहो गंगा महाभागा स्मृता पापप्रणाशिनी ।
हरिलोकप्रदा दृष्टा पीता सारूप्यदायिनी ॥ पू. ६।६७

३. अदृष्टऋतुभी रजस्वलाभिश्च पत्युर्भरणे सहगमनं न कर्तव्यम्—

और्ववऋषिः बाहुपत्नीं कथयति—

बालापत्याश्च गर्भिण्यो ह्यदृष्टऋतवस्तथा ।
रजस्वला राजसुते ! नारोहन्ति चितां शुभे ॥ पू. ७।५२

४. पौत्रसत्वेऽपि तं पुत्रत्वेन परिगृह्णीयात्, अन्यथा यज्ञेऽधिकारो नास्ति—

यज्ञेष्वनधिकारत्वादपुत्राणामितिस्मृतेः ।
पौत्रं तमंशुमन्तं हि पुत्रत्वे कृतवान् प्रभुः ॥ पू. ८।११८ प्रभुः-सगरः

५. प्रायश्चित्त-चिकित्सा-ज्यौतिष-धर्मनिर्णयः शास्त्राधारेण वक्तव्योऽन्यथा ब्रह्म-घातदोषः—

प्रायश्चित्तं चिकित्सां च ज्यौतिषं धर्मनिर्णयम् ।
विना शास्त्रेण यो ब्रूयात्तमाहुर्ब्रह्मघातकम् ॥ पू. १२।६४

६. हरेश्चम्पकपुष्पैर्हरस्यार्कपुष्पैः पूजने तत्तत्सालोक्यप्राप्तिः—

हरिं तु चाम्पकैः पुष्पैरर्कपुष्पैश्च शङ्करम् ।
समभ्यर्च्य महाराज तत्तत्सालोक्यमाप्नुयात् ॥ पू. १३।६२

७. शिवलिङ्गाङ्कितमहिषोत्सर्गे यातनालोकाभावः—

धर्मराजो भगीरथं प्रति कथयति—

शिवलिङ्गाङ्कितं कृत्वा महिषं यः समुत्सृजेत् ।
न तस्य यातनालोको भवेन्नृपतिसत्तम ॥ पू. १३।९४

नृपतिसत्तम-भगीरथ !

८. शालिग्रामशिला-लिङ्गदाने च मोक्षप्राप्तिः, तच्च महादानम्—

शालग्रामशिलादानं महादानं प्रकीर्तितम् ।
यद्दत्वा मोक्षमाप्नोति लिङ्गदानं तथा स्मृतम् ॥ पू. १३।१०३

९. देव्यादिषु प्रदक्षिणासङ्ख्या—

देव्याः प्रदक्षिणामेकां सप्त सूर्यस्य भूमिप । भूमिप-भगीरथ !
तिस्रो विनायकस्यापि चतस्रो विष्णुमन्दिरे ॥ पू. १३।१३८

१०. शिवप्रदक्षिणा सव्येन करणे स्वर्ग स्थिरत्वम् ।

शिवं प्रदक्षिणं कृत्वा सव्येनैव विधानतः ।
नरो न च्यवते स्वर्गाच्छङ्करस्य प्रसादतः ॥ पू. १३।१४०

प्रचलितप्रदक्षिणाक्रमकरणे स्थानाद्यभावे कदाचिदेतत्करणेन विरोधपरिहारः संभवेत् ।

११. ब्राह्मणस्य गोमांसादिभक्षणादिकरणे प्रायश्चितम्—

अगम्यागमने विप्रो मद्यगोमांसभक्षणे ।
तप्तकृच्छ्रपरिक्षिप्तो मौर्वीहोमेन शुद्ध्यति ॥ पू. १४।२९
मौर्वी-यया च धनुषो गुणः क्रियते ।
एतदज्ञानादिना कृते प्रायश्चित्तं स्यात् ।

१२. गवादिवत्सानां रोधबन्धनादौ (तत्प्रयुक्तमरणे) दोषो नास्ति—

वत्सानां कण्ठबन्धेन क्रियया भेषजेन तु ।
सायं संगोपनार्थं च त्वदोषो रोधबन्धयोः ॥ पू. १४।४९

१३. स्त्रीभिः पत्यौ सत्त्वे शिरसो वपनं न कार्यं किन्तु प्रसङ्गे द्व्यङ्गुलच्छेदः—

सर्वान्केशान् समुद्धृत्य छेदयेदङ्गुलद्वयम् ।
एवमेव तु नारीणां मुण्डनं शिरसः स्मृतम् ।
न स्त्रिया वपनं कार्यं न च वीरासनं स्मृतम् ॥ पू. १४।५०-५१

क्वचिद् दाक्षिणात्येषु सर्वशिरोवपनं स्त्रीषु दृश्यते पत्यौ सत्त्वे तिरुपत्यादिदेवस्थानेषु ।

१४. पितृणां स्थानमाकाशं दक्षिणा दिक् च—

पितृणां स्थानमाकाशं दक्षिणा दिक् तथैव च । पू. १४।८९

स्वर्णस्तेयसमपापानि—

पितृयज्ञपरित्यागो धर्मकार्यविलोपनम् ।
यतीनां निन्दनं चैव स्वर्णस्तेयसमं स्मृतम् ॥
भक्ष्याणां चापहरणं धान्यानां हरणं तथा ।
रुद्राक्षहरणं चैव स्वर्णस्तेयसमं स्मृतम् ॥ पू. १५।३९-४०

प्रसिद्धानि सुवर्णस्तेयसमानानि-याज्ञवल्क्यस्मृतौ—

अश्वरत्नमनुष्यस्त्रीभूधेनुहरणं तथा ।
निक्षेपस्य च सर्वं हि सुवर्णस्तेयसंमितम् ॥

प्रायश्चित्तप्रकरणे २३०

१५. सर्वपापेषु प्रायश्चित्तं विद्यते परं तु बौद्धालयगमने प्रायश्चित्ताभावः—

बौद्धालयं विशेद्यस्तु महापद्यपि वै द्विजः ।
न तस्य निष्कृतिर्दृष्टा प्रायश्चित्तशतैरपि ।
बौद्धाः पाषण्डिनः प्रोक्ता यतो वेदविनिन्दकाः ।
तस्माद् द्विजस्तान्नेक्षेत यतो धर्मबहिष्कृताः ॥
ज्ञानतोऽज्ञानतो वापि द्विजो बौद्धालयं विशेत् ।
ज्ञात्वा चेन्निष्कृतिर्नास्ति शास्त्राणामिति निश्चयः ॥पू. १५।५१-५३

१६. सादरं महन्निन्दाश्रवणे पापं तेन यमलोके महती यातना भवति—

यः शृणोति महन्निन्दां सादरं तत्फलं शृणु ।
तेषां कर्णेषु दाप्यन्ते तप्तायःकीलसंचयाः ॥
ततश्च तेषु छिद्रेषु तैलमत्युष्णमुल्बणम् ।
पूर्यते च ततश्चापि कुम्भीपाकं प्रपद्यते ॥ पू. १५।७७-७८

महायातनादिफलश्रवणेन महन्निन्दां न कुर्यादिति विधिः कल्प्यते ।

१७. स्त्रीशूद्रसमीपे वेदाध्ययने यमलोके यातनाबाहुल्यम्—

स्त्रीशूद्राणां समीपे तु ये वेदाध्ययने रताः ।
तेषां पापफलं वक्ष्ये शृणुष्व सुसमाहितः ॥
अधः शीर्षोर्ध्वपादाश्च कीलिता स्तम्भकद्वये ॥ पू. १५।१०१-१०२

अत्रापि यातनाश्रवणेन निषेधः कल्पनीयः ।

१८. समर्थः सन्नन्याचाररतमनिराकुर्वन् तत्पापभाग् नरकगामी च भवति—

अन्याचाररतं दृष्ट्वा यः शक्तो न निवारयेत् ।
तत्पापं समवाप्नोति नरकं तावुभावपि ॥ पू. १५।११४

अन्याचाररतः स्वस्याविहितकर्मकर्ता, तावुभौ=अन्याचारकर्ता तदनिवारकश्च ।

१९. न्यूनातिरिक्तपूरकाणि हरिकीर्तनेन समानि गङ्गा तुलस्यादीनि—

न्यूनातिरिक्तकृत्यानां संपूर्तिकरणाय च ।
गङ्गा च तुलसी चैव सत्सङ्गो हरिकीर्तनम् ॥
अनसूया ह्यहिंसा च सर्वेऽप्येते हि पापहाः ॥ पू. १५।१३६

२०. स्वधर्मपालनाविरोधेन परमेश्वरभक्तिः कार्याऽन्यथा साऽकृतैव भवति—

तस्माच्छृणुष्व भूपाल संसारविजिगीषुणा ।
स्वकर्मणोऽविरोधेन भक्तिः कार्या जनार्दने ॥
यः स्वधर्मं परित्यज्य भक्तिमात्रेण जीवति ।
न तस्य तुष्यते विष्णुराचारेणैव तुष्यते ॥
सर्वागमानामाचारः प्रथमः परिकल्पते ।
आचारप्रभवो धर्मो धर्मस्य प्रभुरच्युतः ॥
तस्मात्कार्या हरेर्भक्तिः स्वधर्मस्याविरोधिनी ।
सदाचारविहीनानां धर्मा अप्यसुखप्रदाः ॥
स्वधर्महीना भक्तिश्चाप्यकृतैव प्रकीर्तिता ।
तस्माद्धर्मपरो भूत्वा पूजयस्व जनार्दनम् ॥ पू. १५।१५२-१५७

भूपाल=भगीरथ ! एवमत्याश्रमिणां जीवन्मुक्तभक्तानां व्यवहारं दृष्ट्वा कर्मणां वैयर्थ्यं प्रतिपादयन्तः सांप्रतिका भक्ताभासा निरस्ताः ।

अनधिकारिणे निषिद्धदर्शनेषु भिषजादिषु काव्यकर्तुरपि दर्शनं निषिद्धम्—

भिषजं काव्यकर्तारं देवद्विजविरोधिनम् ।
परान्नलोलुपं चैव परस्त्रीनिरतं तथा ॥
व्रतोपवासनिरतो वाङ्मात्रेणापि नार्चयेत् ॥ पू. २३।२७-२८

२२. महत्यप्यापत्काले शूद्रवृत्त्यालम्बनं नैव कार्यमन्यथा चाण्डालताप्राप्तिः—

नाश्रयेच्छूद्रवृत्तिं तु अत्यापद्यपि वै द्विजः।
यद्याश्रयेद् द्विजो मूढस्तदा चाण्डालतां व्रजेत् ॥ पू० २४।३२

२३. जातकर्मणि केनापि प्रकारेण वृद्धिश्राद्धमन्नेन न करणीयं करणे चाण्डालसमता—

हेम्ना वा रजतेनापि वृद्धिश्राद्धं प्रकल्पयेत्।
अन्नेन कारयेद्यस्तु स चाण्डालसमो भवेत् ॥ पू० २५।६

२४. विषमाद्यक्षरं नाम नामकर्मसंस्कारे न स्थापयेत्—

अस्पष्टमर्थहीनं च श्रुतिगुर्वक्षरान्वितम्।
न दद्यान्नाम विप्रेन्द्र तथा च विषमाक्षरम् ॥ पू० २५।७

"द्व्यक्षरं चतुरक्षरं वा" इति गृह्यसूत्रेण "माङ्गल्यं ब्राह्मणस्य" "शर्मवद् ब्राह्मणस्य" "स्त्रीणां सुखोद्यममक्रूरम्' इति मनुना च नारदीयं समन्वैति परंतु कुल्लूकभट्टटीकायामुदाहरणप्रदर्शने "यथा यशोदादेवीति" कथनं कथंचित्कन्यापुत्रयोः सम-विषमाक्षरादिकं प्रकल्प्य समन्वेतुं शक्यम्।

२५. द्विजानामुपनयने मुख्यकालातिक्रमे व्रात्यस्तोमक्रतुतो भिन्नं प्रायश्चित्तम्—

द्विजोपनयने विप्र मुख्यकालव्यतिक्रमे।
द्वादशाब्दं चरेत्कृच्छ्रं पश्चाच्चान्द्रायणं तथा ॥
सान्तपनद्वयं चैव कृत्वा कर्म समारभेत्।
अन्यथा पतितं विद्यात्कर्तापि ब्रह्महा भवेत् ॥ पू० २५।१५-१६

अन्यत्र स्मृत्यादौ गौणकालेऽतिक्रान्ते व्रात्यपदभाजो व्रात्यस्तोमक्रतुं विना संस्कारार्हा न भवन्तीति प्रतिपादितम्। यथा याज्ञवल्क्यः "आषोडशाद् द्विविंशाच्चतुर्विंशाच्च वत्सरात्। ब्रह्मक्षत्रविशां काल औपनायनिकः परः ॥ (परः-गौणः) सावित्रीपतिता व्रात्या व्रात्यस्तोमादृते क्रतोः" ॥ इत्याह।

२६. सभादिषु प्रत्येकं नमस्कारो वर्ज्यः—

सभायां यज्ञशालायां देवतायतनेष्वपि।
प्रत्येकं तु नमस्कारो हन्ति पुण्यं पुराकृतम् ॥ पू० २५।४२

अत्र पुराकृतपुण्यनाशश्रवणात्सर्वानुद्दिश्यैकं नमस्कारं कुर्यादिति विधिः कल्पनीयः ।

२७. मुख्यसापिण्ड्यपरित्यागे गुरुस्त्रीगमनदोष :—

मातृतः पञ्चमीं धीमान् पितृतः सप्तमीं तथा ।
द्विजः समुद्वहेत्कन्यामन्यथा गुरुतल्पगः ॥ २६।४

अस्य वचनस्यार्थसंगमनं कथं चित् "समुद्वहेत्" इत्यत्र "समुद्धरेत्" इति पाठं प्रकल्प्य मातृतो मातुः सन्ताने पञ्चमीकन्यापर्यन्तं समुद्धरेत नाम कन्यास्त्यक्त्वा, पितृतः—पितृसन्ताने सप्तमीकन्यापर्यन्तं कन्याः समुद्धरेद्-त्यक्त्वा विवाहो योग्यः । यथाह याज्ञवल्क्यः— "पञ्चमात्सप्तमादूर्ध्वं मातृतः पितृतस्तथा" ५३ इति ।

अथवा वसिष्ठवचनस्य "पञ्चमीं सप्तमीं चैव मातृतः पितृतस्तथा" इत्यस्य यथा अर्वाङ्निषेधार्थं न पुनस्तत्प्राप्त्यर्थमित्यर्थो मिताक्षरायां कृतस्तथा करणीयः ।

२८. आर्द्रास्थ्यादि स्पर्शे सचैलं स्नानम्—

आर्द्रास्थि च तथोच्छिष्टं शूद्रं च पतितं तथा ।
सर्पं च भक्षणं स्पृष्ट्वा सवासास्स्नानमाचरेत् ॥
स्पृष्ट्वा देवलकं चैव सवासा जलमाविशेत् ॥ पू० २५।३०-३१

देवलकं-देवार्चकं (कदाचिच्छिवलिङ्गपूजकं शिवनिर्माल्यादिग्राहकं महाराष्ट्रदेशे गुरवपदवाच्यम्) एवं शूद्रपदं च सच्छूद्रभिन्नशूद्रपरं बोध्यम् ।

२९. ऊर्ध्वपुण्ड्रादि श्राद्धे निषिद्धम्—

ऊर्ध्वपुण्ड्रं च तुलसीं श्राद्धे नेच्छन्ति केचन ॥ २६।४४

महाराष्ट्रदेशे तुलसीं विना श्राद्धं न संपद्यते, अत एव केचिदित्युक्तम् ।

३०. पञ्च प्राणाय स्वाहेत्याद्या आहुतीर्मुखे दत्त्वाऽऽचमनं कृत्वा भोजनं कार्यम्—

प्राणाद्याहुतीर्दत्त्वाऽऽचम्य भोजनमाचरेत् ॥ पू. २७।८२

संप्रति उपस्तरणरूपाचमनं कृत्वा प्राणाद्याहुतीर्दत्त्वा नेत्रे जलेन संस्पृश्य भोजनं समाचरन्ति ।

३१. श्राद्धदिवसात्पागू (पूर्वदिनस्य) निशि विप्रनिमन्त्रणम्—

क्षयाहपूर्वदिवसे स्नात्वा चैकाशनो भवेत् ।
अधःशायी ब्रह्मचारी निशि विप्रान् निमन्त्रयेत् ॥ पू. २८।२

३१. गायककाव्यकर्त्रादिकाः श्राद्धे निषिद्धाः, तत्र काव्यकर्तुर्निषेधोऽन्यत्राप्रसिद्धः—

गायकाः काव्यकर्तारो भिषक्शास्त्रोपजीविनः । पू. २८।१७

३३. सर्वथा श्राद्धे वेदविद्विप्रप्राप्त्यभावे भ्रात्रादीन् श्राद्धे नियुञ्जीत न तु मूर्खम्—

ब्राह्मणानामभावे तु भ्रातरं पुत्रमेव च ।
आत्मानं वा नियुञ्जीत न विप्रं वेदवर्जितम् ॥ पू. २८।३४

अत्रात्मनो योजना कथञ्चिद् "आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः" इतिवत् उपाधिनाऽऽत्मानं विभज्य संपादयितुं शक्यते ।

३४. श्राद्धे विभक्तिविचारे विशेषः—

अक्षय्यासनयोः षष्ठी द्वितीयाऽऽवाहने स्मृता । पू. २८।३७

सर्वत्र प्रसिद्धपाठः पद्धतिश्चैतादृशी "संकल्पासनयोः षष्ठी द्वितीयाऽऽवाहने तथा"

३५. मकरसंक्रमणे पराञ्चिशद्घटिकाः पूर्वाश्चत्वारिंशच्च घटिका पुण्यकालः—

माकरं संक्रमणं प्राहुरुत्तरायणसंज्ञकम् ।
पराञ्चिशच्च घटिकाश्चत्वारिंशत पूर्ववत् ॥ पू. २९।२५

प्रसिद्धग्रन्थेषु "मकरे विंशती परे" इति सिद्धान्तः ।

३६. कलामात्रस्थित-द्वादश्यां पारणानुरोधेन विद्धापि दशमी तिथिरुपोषणार्हा—

द्वादश्यां तु कलायां वा यदि लभ्येत पारणा ।
तदानीं दशमी विद्धाप्युपोष्यैकादशी तिथिः ॥ पू. २९।४४

३७. परनाशाय पूजादिकरणं स्वनाशायैव कल्पते—

अन्यश्रेयोविनाशार्थं येऽर्चयन्ति जनार्दनम् ।
सा पूजैव महाभाग पूजकानाशु हन्ति वै ॥ पू. ३७।७

३८. स्थण्डिलाद्युल्लेखनं समिधा याज्ञे स्मार्ते कर्मणि क्रियतेऽत्र स्रुवेण कुशेन वोक्तम्—

स्रुवेण च कुशेनापि कुर्यादुल्लेखनं बुधः ॥ पू. ५१।१८

३९. प्रायो ब्रह्माथर्ववेदी भवति परन्त्वत्र स्वशाखीयो लिखितः—

ब्रह्माचार्यौ स्वशाखौ हि कर्तव्यौ यज्ञकर्मणि ।
ऋत्विजां नियमो नास्ति यथाशाखं समर्चयेत् ॥ पू. ५१।२५

४०. सामगानप्रारम्भे प्रणवव्याहृतिसावित्रीणामुच्चारणमावश्यकम्—

प्रणवं प्राक् प्रयुञ्जीत व्याहृतीस्तदनन्तरम् ।
सावित्रीं चानुवचनं ततो वै गानमाचरेत् ॥ पू. ५१।८३

संप्रति तु ॐ स्थानीयं हूँ (मा) इति समुच्चार्य सामगानं समाचरन्ति ।

४१. मातृयागं (गौर्यादिमातृपूजनं) विना स्वतन्त्रतया ग्रहयागं न कुर्यात्—

अकृत्वा मातृयागं तु यो ग्रहार्चां समारभेत् ।
कुप्यन्ति मातरस्तस्य प्रत्यूहं कुर्वते तथा ॥ पू. ५१।९५

यत्र मातृयागग्रहयागयोरुभयोरपि विधानं तत्रेति योजनीयम् । ग्रहयागस्य याज्ञवल्क्येन "श्रीकामः शान्तिकामो वा ग्रहयज्ञं समाचरेत्" (२९५) इति स्वातन्त्र्येण विधानात् ।

४२. देवपूजा त्वनेकप्रकारा तस्या भेदास्त्वातुरीप्रभृतयः—

पूजा पञ्चविधा तत्र कथिता नारदादिभिः ॥ पू. ६७।१२४
आतुरी सौतिकी त्रासी साधनाभाविनी तथा ।
दौर्बोधी च क्रमादासां लक्षणानि शृणुष्व मे ॥

१ आतुरो रोगादियुक्तो न स्नायान्न जपेन्न च पूजयेत् ।
विलोक्य पूजां देवस्य मूर्तिं वा सूर्यमण्डलम् ॥
प्रणम्याथ स्मरन्मंत्रमर्पयेत्कुसुमाञ्जलिम् ।
रोगे निवृत्ते स्नात्वाथ नत्वा संपूजयेद् गुरुम् ॥ पू. ६७।१७
त्वत्प्रसादाज्जगन्नाथ जगत्पूज्य दयानिधे । पू० ६७।१२८
पूजाविच्छेददोषो मे मास्त्विति प्रार्थयेच्च तम् ॥

द्विजानपि च संपूज्य यथाशक्त्या प्रतोष्य च ।
तेभ्यश्चाशिषमादाय देवं प्राग्वत्ततोऽर्चयेत् ॥
आतुरी कथिता ह्येषा सौतिक्यथ निगद्यते ।

२ सौतिकी सूतकं द्विविधं प्रोक्तं जाताख्यं मृतसंज्ञकम् ॥
तत्र स्नात्वा मानसीं तु कृत्वा सन्ध्यां समाहितः ।
मनसैव यजेद्देवं मनसैव जपेन्मनुम् ।
निवृत्ते सूतके प्राग्वत्संपूज्य च गुरुं द्विजान् ॥
तेभ्यश्चाशिषमादाय ततो नित्यक्रमं चरेत् ।
एषा तु सौतिकी प्रोक्ता त्रासी चाथ निगद्यते ॥

३ त्रासी दुष्टेभ्यस्त्रासमापन्नो यथा लब्धोपचारकैः ।
मानसैर्वा यजेद्देवं त्रासी सा परिकीर्तिता ॥

४ साधना- पूजा-साधनवस्तूनामसामर्थ्ये तु सर्वतः ।
भाविनी पुष्पैः पत्रैः फलैर्वापि मनसा वा यजेद्विभुम् ।
साधनाभाविनी ह्येषा दौर्बोधीं शृणु नारद

५ दौर्बोधी स्त्रियो वृद्धास्तथा बाला मूर्खास्तैस्तु यथाक्रमम् ।
यथाज्ञानकृता सा तु दौर्बोधीति प्रकीर्तिता ॥
एवं यथा कथञ्चित्तु पूजां कुर्याद्धि साधकः ।
देवपूजाविहीनो यः स गच्छेन्नरकं ध्रुवम् ॥ पू० ६७।१३७

४३. प्रायस्तान्त्रिका मन्त्राः पित्रा शिष्यादिभ्यो दीयन्ते न तु स्वपुत्राय परन्तत्र तान्त्रिकमन्त्रविषये स्वपुत्राय दानं निहितम्—

मनवोऽमी सदा गोप्या न प्रकाश्या यतस्ततः ।
परीक्षिताय शिष्याय देया वा निजसूनवे ॥ पू० ७५।१०५

४४. यस्य यत्प्रियं वस्तु तत्तस्मै समर्पयेत्, कस्मै किं प्रियं तत्प्रतिपादितम्—

दीपप्रियः कार्तवीर्यो मार्तण्डो नतिवल्लभः ।
स्तुतिप्रियो महाविष्णुर्गणेशस्तर्पणप्रियः ॥
दुर्गार्चनप्रिया नूनमभिषेकप्रियः शिवः ।
तस्मात्तेषां प्रतोषाय विदध्यात्तत्तदादरात् ॥ पू० ७६।११५-११६

४५. शिवपूजा तिलमिश्रैरक्षतैः केवलैश्च वा कर्तव्या—

मुद्धृतेन तस्य मध्ये महेशं लिङ्गाकारं पीठयुक्तं प्रपूज्य ।
एवं कृत्वा साधकास्ते तु सर्वे दत्त्वा दत्त्वा पञ्चगन्धाष्टगन्धम् ।
पुष्पैः पत्रैः श्रीतिलैरक्षतैश्च तिलोन्मिश्रैः केवलैश्च प्रपूज्या ॥
पू० ७९।४७-४८

४६. फाल्गुनपूर्णिमायां होलिकापूजनदाहप्रसङ्गेऽमंगलशब्दोच्चारणादिप्रकारोऽन्यत्र स्फुटोल्लिखितोऽप्यत्र नास्ति किन्तु गीतमङ्गलैर्दाहो विहितः, अयं च संवत्सरदाहशब्देन लोके प्रसिद्धः, केषांचिन्मते कामदाहपदेनापि प्रसिध्यति—

फाल्गुने पूर्णिमायां तु होलिकापूजनं मतम् ।
संचयं सर्वकाष्ठानामुपलानां च कारयेत् ॥
तत्राग्निं विधिवद्दत्त्वा रक्षोघ्नैर्मन्त्रविस्तरैः ।
असृक्पाभयसंत्रस्तैः कृता त्वं होलि बालिशैः ॥
अतस्त्वां पूजयिष्यामि भूते भूतिप्रदा भव ।
इति मन्त्रेण संदीप्य काष्ठादिक्षेपणैस्ततः ॥
परिक्रम्योत्सवः कार्यो गीतवादित्रनिःस्वनैः ।
होलिका राक्षसी चेयं प्रह्लादभयदायिनी ॥
अतस्त्वां प्रदहन्त्येवं काष्ठाद्यैर्गीतमङ्गलैः ।
संवत्सरस्य दाहोऽयं कामदाहो मतान्तरे ॥
इति जानीहि विप्रेन्द्र लोके स्थितिरनेकधा ॥ पू० १२४।७६-८१

लोकेस्थितिरनेकधा कथनेन होलिकोत्सवस्य नैकविधत्वमनेकनामसत्ता च बोध्यते ।

४७. भाद्रपदामावास्यायां तिलक्षेत्रसमुद्भवदर्भान् संच्छिद्यानाय्य स्थापने ते दर्भाः सर्वदा यावद्वर्षमुपयोगिनो भवन्ति—

भाद्रदर्शेऽपराह्णे तु तिलक्षेत्रसमुद्भवान् ।
विरिञ्चिमनुनामन्त्र्य हुंफट्छिन्नान्कुशान् द्विज ।
सर्वदा सर्वकार्येषु योजयेदेकदाऽपरान् ॥ पू० १२४।८६-८७

अत्र भागेऽपरस्मिन् भागे च निषेधेन, लेट्कल्पनेन च बहुप्रकाराणि कृत्यत्र प्रायोऽप्रसिद्धानि धर्मबोधकवचनान्युन्नयितुं शक्येरन् । परन्त्वयं

प्रयत्नः सर्वमान्यो भविष्यति न वेति विषये चेतः संदेग्धि । किञ्च स्वायत्ते शब्दप्रयोगे कुत्रचिद् भगवान् व्यासो विधिलिङं प्रयुङ्क्ते । कुत्र चिल्लुटं कुत्रचिद् भूतकालबोधकलिटादिलकारान् । कुत्रचिन्निषेधं च लिखति । अतः स्यात्तस्य सर्वादरणीयस्य महतो विदुषो लोकोपकारं कर्तुमेव धृत-शरीरस्याभिप्रायविशेषः । अतः क्वचित्तादृशः प्रयत्नः (अ० ६ श्लो० २२ तथा अ० १५ श्लो० ७७-७८, १०१-१०२) कृतः परन्त्वेत-त्करणमपि सर्वथानुचितमेव, अर्थवादतुल्यमेवैतादृशं किमपि कल्पनीयम् । अर्थवादकल्पनाकरणे महदश्रेयः प्राप्नोति कल्पकमिति प्रारम्भे एवोक्तम् । एवं च पुराणेषु विशेषतो नारदपुराणे यद्वाक्येन यद्यदर्थजातं बोध्यते तत्तथैवेति स्वीकरणीयमेव कल्याणाय कल्पेतेति सुनिश्चितम् ।

—:०:—

बृहन्नारदमहापुराणस्योत्तरभागः

१. ज्ञाताज्ञातपातकयोरार्द्रशुष्के संज्ञे अत्रैवोपलभ्येते, प्रायोऽन्यत्र न स्तः—

अज्ञातं पातकं शुष्कं ज्ञातं चार्द्रमुदाहृतम् ॥ उ. १।५

२. आगमेषु विरुद्धेषु ब्राह्मणेषु च विवदमानेषु द्वादश्यैवोपोष्या—

बह्वागमविरोधेषु ब्राह्मणेषु . विवादिषु ।
उपोष्या द्वादशी पुण्या त्रयोदश्यां तु पारणम् ॥उ. २।३०

३. बालादिभिरेकादशीदिने नोपवासः कर्तव्य इति व्यवस्थां निराकृत्य तैरपि उपवासः कर्तव्य इति व्यवस्था रुक्मांगदेन स्वराज्ये स्थापिता—

बालो युवा वा वृद्धो वा गुर्विणी वा कुमारिका ।
सरोगो विकलो वापि न शक्नोति ह्युपोषितुम् ॥
इत्येवं जल्पितं यैस्तु तान्निरस्य समंततः ।
वचोभिस्तु पुराणोक्तैर्बासरैर्बहुभिस्त्वहम् ॥ अहम्-रुक्माङ्गदः ।
संबोधयित्वा बहुशः प्रजानां सुखहेतवे ।
निगृह्य तान् हरिदिने निराहारान् करोमि च ॥

शास्त्रदृष्ट्या तु विदुषो मूर्खान् दण्डनपूर्वकम् ।
शासयित्वा कृताः सर्वे निराहारा हरेर्दिने ॥ उ. ९।१४-१८

४. सर्वत्र जीवघातकाः पञ्चविधाः प्रोक्ताः, अत्र षट्प्रकारा जीवघातकानाम्—

षड्विधं नृपते प्रोक्तं विद्वद्भिर्जीवघातनम् ।
अनुमोदयिता पूर्वं द्वितीयो घातकः स्मृतः ॥
विश्वासकस्तृतीयोऽपि चतुर्थो भक्षकः स्मृतः ।
पञ्चमः पाचकः प्रोक्तः षष्ठो भूपात्र विग्रही ॥ उ. १०।८-९

५. चाण्डालेषु कुमारिकासंभवोप्येकः परिगणितः—

अनूढा कन्यका राजन् यदि गर्भं बिभर्ति हि ।
प्रसूयति दिवाकीर्तिं सर्ववर्णविगर्हितम् ॥ २
चाण्डालयोनयस्तिस्रः पुराणे कवयो विदुः ।
कुमारीसंभवा ह्येका सगोत्रापि द्वितीयका ।
ब्राह्मण्यां शूद्रजनिता तृतीया नृपपुंगव ! ॥ उ. १३।४ रुक्मांगद !

६. एकस्यां भार्यायां सत्त्वे द्वितीयापरिणये जेष्ठायै द्विगुणं द्रव्यदानमभिलषितं वा देयम्—

यो भार्यामुद्वहन् भर्ता द्वितीयामपरामपि ।
जेष्ठायै द्विगुणं तस्या दद्याच्चैवान्यथा ऋणी ॥
अनुज्ञाप्य यदा भर्ता ज्येष्ठामन्यां समुद्वहेत् ।
तदा ज्येष्ठाभिलषितं देयमाहुः पुराविदः ॥ उ. १८।३०-३२

७. पितुः पुत्रोद्वाहाकरणे नरकगमनम्, गुणहीनस्यापि पुत्रस्य विवाहः कार्य एव—

यः पुत्रस्य पितोद्वाहं न करोतीह मन्दधीः ।
स मज्जेन्नरके घोरे ह्यप्रतिष्ठे युगायुतम् ।
... ...
पुत्रस्य गुणयुक्तस्य निर्गुणस्यापि सत्तमे ।
पित्रा कारयितव्यो हि विवाहो धर्ममिच्छता ॥ उ. २१।१०-१३

८. कार्तिके मांसभक्षणे चाण्डालत्वम्—

चाण्डालो जायते देवि कार्तिके मांसभक्षणात् ॥ उ. २२।५८

९. कार्तिके विनोत्तरायणलग्नशुद्धौ विवाहः कर्तव्यः, एवं वर्षव्रतसमाप्तिश्च—

संवत्सरव्रतानां हि समाप्तिः कार्तिके स्मृता ।
विवाहा यत्र दृश्यन्ते विष्णोर्नाभिसरोरुहे ॥
दिनानि यत्र चत्वारि यथैकं वरवर्णिनि ! । मोहिनि !
विनोत्तरायणे काले लग्नशुद्धिं विनापि च ॥
दृश्यन्ते यत्र सम्बन्धाः पुत्रपौत्रविवर्धनाः ॥ उ. २२।६३-६५

१०. केन कृत्येन कस्यां कस्यां तिथौ पातकं भवत्यत्र विचारविशेषः—

त्रैलोक्यघातिनः पापं मैथुने शशिनः क्षये ।
नरस्य संचरेत्पापं भूतायां क्षौरकर्मणि ॥
भोजने वासरे विष्णोस्तैले षष्ठ्यां व्यवस्थिते ॥
लवणे तु तृतीयायां सप्तम्यां पिशिते शुभे !
आज्येषु पौर्णमास्यां वै सुरायां रविसंक्रमे ॥ २३।६८-७०

एतच्च प्रायः कार्तिके मासे इति प्रतिभाति, उपक्रमे तस्यैव प्रचलितत्वात् ।

११. द्वादश्यां (एकादश्यां) केन भोक्तव्यं केन नेतिविषये रुक्मांगदमोहिनीविवाद एकादशीकर्तव्यनिर्णयविषये विचारणीयोऽस्ति—

एकभुक्तेन नक्तेन तथैवायाचितेन च ।
उपवासेन राजेन्द्र द्वादशीं न हि लङ्घयेत् ॥
गुर्विणीनां गृहस्थानां क्षीणानां रोगिणां तथा ।
शिशूनां बलिगात्राणां न युक्तं समुपोषणम् ॥
यज्ञभोगोद्यतानां च संग्रामक्षितिसेविनाम् ।
पतिव्रतानां राजेन्द्र न युक्तं समुपोषणम् ॥
एतन्मे गौतमः प्राह स्थिताया मन्दराचले ॥
ते गृहस्था द्विजा ज्ञेया येषामग्निपरिग्रहः ।
राजानस्ते तु विज्ञेया ये प्रजापालने स्थिताः ॥

गुर्विणी ह्यष्टमासीया शिशवश्चाष्टवत्सराः ।
अतिलङ्घिनिः क्षीणा वलिगात्रास्तु वार्धकाः ॥
ये विवाहादिमाङ्गल्यकर्मव्यग्रा महोत्सवाः ।
निवृत्ताश्च प्रवृत्तेभ्यो यज्ञानां चोद्यता हि ते ॥
त्रिविधेन पुराणेन (प्रकारेण) भतुर्या स्त्री हिते रता ।
पतिव्रता तु सा ज्ञेया योनिसंरक्षणा तथा ॥ उ. २१।७५-८२

रुक्मांगदः— यत्त्वया व्याहृतं वाक्यं ममेदं गौतमेरितम् ।
अमतेन पुराणानां व्याहृतं यद्द्विजन्मना ॥
क्षुद्रशास्त्रोपदेशेन लोलुपेन वरानने ।
पुराणे निर्णयो ह्येष विद्वद्भिः समुदाहृतः ॥
न शंखेन पिबेत्तोयं न हन्यात्कूर्मसूकरौ ।
एकादश्यां न भोक्तव्यं पक्षयोरुभयोरपि ॥
पुरोडाशोऽपि वामोरु संप्राप्ते हरिवासरे ।
अभक्ष्येण समः प्रोक्तः किं पुनश्चाशनक्रिया ॥ उ. २५।२-६
चतुष्पदेभ्योऽपि जनैर्नान्नं देयं हरेर्दिने ।
उत्तराशास्थितैर्विप्रविष्णुधर्मपरायणैः ॥ उ. २५।१६

१२. काश्यामशुभकर्मक्वच्छुभकर्माणि नश्यति यतो मरणान्मुक्तिप्राप्ते :—

विनश्यन्तीह कर्माणि शुभान्यप्यशुभानि च ।
भूतभव्यभविष्याणि ज्ञानाज्ञानकृतानि च ॥ उ. २९।७१

१३. एकासने स्त्री (कन्या) पुरुषयोः स्थित्या भर्तृभार्यात्वसिद्धिः—

येनैकासनगा नारी भवेद्भर्ता स एव हि ।
नान्य इत्थं पुराणेषु श्रूयते ह्यागमेष्वपि ॥

१४. प्रायोऽत्र द्वादशी उपोष्येत्यनेकत्र प्रोक्तम्, एकादशीसमुपोष्येत्यपि क्वचित्—

श्रूयते हि पुराणेषु गाथाः सुभ्रु समीरिताः ।
द्वादशीं प्रति संबद्धाः स्वर्गमोक्षप्रदायिकाः ॥
न त्यजेद् द्वादशीं पुण्यां पक्षयोरुभयोरपि ॥ उ. ३२।९-१४

१५. पित्रादिप्रयोजनसिद्ध्यै मरणं मृतस्य श्रेष्ठलोकप्रापकम्—

पितुरर्थे हता ये तु मातुरर्थे हतास्तथा ।
गवार्थे ब्राह्मणार्थे वा प्रमदार्थे महीपते ॥
भूम्यर्थे पार्थिवार्थे वा देवतार्थे तथैव च ।
बालार्थे विकलार्थे च यान्ति लोकान् सुभास्वरान् ॥उ.३३।६२-६४

१६. धर्माङ्गदः पितरं रुक्मांगदं प्रति—

धर्मार्थे तनयं हन्याद् भार्यां वापि महीपते ।
श्रूयते वेदवाक्येषु पुत्रं हन्यान्मखस्थितः ॥
अश्वमेधे मखवरे न दोषो जायते नृप ॥ उ. ३३।६६

१७. कार्यस्य संपादने अफलेऽपि प्राप्ते स्वामिना भृत्याय वेतनं देयं तुष्टिफलं तु न देयम्—

सिद्धौ वाप्यथवासिद्धौ कर्मकृत्स्यादवृथा न हि ।
भर्तव्यो भृत्यवर्गश्च भूभुजा धर्ममिच्छता ।
सद्भावे घटमानस्य यदि कर्म न सिद्ध्यति ॥
देयं वेतनमात्रं तु न च तुष्टिफलं भवेत् ।
यो न तस्मै प्रयच्छेत जीवनं जीवनाय वै ।
गोवधं समवाप्नोति स नरो नात्र संशयः ॥ उ. ३५।३५-३८

१८. भृत्येनापि कार्यसिद्धौ वेतनं ग्राह्यमन्यथा नरकप्राप्तिः—

असाधिते तु यः कार्ये नरो गृह्णाति वेतनम् ।
स्वामिनं तु परित्यज्य प्रयाति नरकं ध्रुवम् ॥ उ. ३५।४८
भृत्ये कार्यकरणसंलग्ने दैवात्कार्यं न सिद्ध्यति तदा स्वामिप्रदत्तं जीवनं ग्राह्यम्, परन्तु कार्यमङ्गीकृत्यापि यो भृत्यः कार्यं न साधयति जीवनं तु गृह्णाति स नरकगामी ।

१९. मनुष्याणां स्वामिकार्याकरणानामधोगतिविषये किं वक्तव्यं देवा अप्यधोगतिभाजो भवन्ति—

न साधयन्ति ये कार्यं स्वामिनां तु दिवौकसः ।
भृत्या वेतनभोक्तारो जायन्ते भूतले हयाः ॥ उ. ३५।४९

२०. अज्ञानाद् हरिवासरे भुज्यतामित्युक्ते जातपापस्य प्राणायामशतकरणं प्रायश्चितम्—

अज्ञानाद् व्याहृते वाक्ये भुज्यतां हरिवासरे ।
तस्यापि शुद्धिर्गदिता प्राणायामशतेन हि ॥ उ. ३५।६६

२१. पतिव्रताख्यीकरणीयभर्तृसेवाप्रकारः—

वेदैः शुश्रूषणं भर्तुः स्त्रीणां धर्मः प्रकीर्तितः ।
यद् ब्रवीति पतिः किंचित् तत्कार्यमविशङ्कया ॥
शुक्लं शुक्लमिति ब्रूयात्कृष्णं कृष्णेति चामराः ।
शुश्रूषा सा हि विज्ञेया न शुश्रूषा हि सेवनम् ॥ उ. ३५।७३-७४

२२. महति कार्ये संपादनीये ज्येष्ठेन कनिष्ठस्य कृतः प्रणामो न दोषाय भवति—

कार्ये महति संप्राप्ते ह्यसाध्ये भुवनत्रये ।
न दूषितं भवेद् भूप यविष्ठस्याभिवादनम् ॥ उ. ३६।३२

२३. दशम्या निशीथ एकादश्या वेधो देवकृतैकादशीविषयः, सूर्योदये वेधोऽसुराणां कृते—

वेधो निशीथे देवानामुपकाराय मोहिनि ।
सूर्योदयेऽसुराणां च हरिणा परिकल्पितः ॥ उ. ३७।२

२४. वैष्णवानां कृतेऽष्टमहाद्वादशिकास्तासूपवासः—

महाद्वादशिका ह्यष्टौ याः स्मृता वैष्णवागमे ।
तास्तु ह्येकादशीभिन्ना उपोष्यन्ते च वैष्णवैः ॥
एकादशीव्रतं भिन्नं वैष्णवानां महात्मनाम् ।
नित्यं पक्षद्वये प्रोक्तं विधिना त्रिदिनात्मके ॥
सा प्रातस्त्यजेद्भुक्तिं क्रमात्पूर्वापराह्णयोः ।
एकादशी यदा भिन्ना उपोष्या हि परेऽहनि ॥
द्वादश्यां हि व्रतं कार्यं निरम्बु समुपोषणम् ॥ उ. ३७।२-६

२५. लङ्घनं कर्तुमेकादशीदिनेऽसमर्थानां कृते श्राद्धद्रव्यविधानं तत्परिमाणं च—

लङ्घने त्वसमर्थानां जलं शाकं फलं पयः ।
नैवेद्यं वा हरेः प्रोक्तं स्वाहारात्पादसंमितम् ॥

सकामाः सूर्योदये दशम्या वेधे विद्धैकादशीं त्यजन्ति, निष्कामा मध्यरात्रे दशमीविद्धां त्यजन्ति—

स्मार्ताः सूर्योदये विद्धां त्यजन्त्येकादशीं सति । मोहिनि !
निष्कामा मध्यरात्रे च विद्धां मुञ्चन्ति याम्यया ॥दशम्या उ. ।३७।७८

१६. गङ्गायास्तिथ्यादिदिनभेदप्रकारेण भूम्यादि स्थितिः—

पक्षादौ कृष्णपक्षे तु भूमौ संनिहिता भवेत् ।
यावत्पुण्या ह्यमावास्या दिनानि दश मोहिनि ॥
शुक्लप्रतिपदादेश्च दिनानि दश सङ्ख्यया ।
पाताले संनिधानं तु कुरुते स्वयमेव हि ॥
आरभ्य शुक्लैकादश्या दिनानि दश यानि तु ।
पञ्चम्यन्तानि सा स्वर्गे भवे संनिहिता तदा ॥ उ. ३८।१७-१९

१७. गंगांभो विष्णुस्वरूपमेव, अन्यत्र विष्णुपादोदकरूपम् विष्णुपादसंभावं च—

योऽसौ सर्वगतो विष्णुश्चित्स्वरूपी जनार्दनः ।
स एव द्रवरूपेण गङ्गाम्भो नात्र संशयः ॥ उ. ३८।२३

१८. अन्यत्र कृतं पापं गंगातीरे विनश्यति गंगातीरजं पापं गंगास्नानेन नश्यति—

अन्यस्थानकृतं पापं गंगातीरे विनश्यति ।
गंगातीरे कृतं पापं गंगास्नानेन नश्यति ॥ उ. ३९।२५

१९. चतुर्दश्यष्टम्योर्वाराणस्यां गंगा सद्यो मुक्तिदा—

वाराणस्यां विशेषेण गंगा सद्यस्तु मुक्तिदा ।
प्रतिमासं चतुर्दश्यामष्टम्यां चैव सर्वदा ॥ उ. ३९।४३

२०. गंगायां प्रातः स्नानापेक्षया शिवसंन्निधौ सायंकाले कृतं स्नानमनन्तं फ ददाति—

प्रातः स्नानाद्दशगुणं पुण्यं मध्यन्दिने स्मृतम् ।
सायंकाले शतगुणमनन्तं शिवसंनिधौ ॥ उ. ३९।४४-४५

अत्र सर्वत्र प्रातः स्नानं कृत्वैव मध्यंदिनादिस्नानकर्तुः फलमिति मन्तव्यम् ।

३१. गृहे स्नानप्रसङ्गे गंगानामोच्चारणे नाकगमनं वरुणेनोक्तम्—

यो गृहे स्वे स्थितोऽपि त्वां स्नाने संकीर्तयिष्यति ।
सोऽपि यास्यति नाकं वै इत्याह वरुणश्च ताम् ॥ तां गगां,
उ. ३९।४८

३२. गंगातीरे माघमासे नक्तभोजनस्य विशेषफलं नक्तभोजनकर्तुर्नियमाश्च—

देवैस्तु भुक्तं पूर्वाह्णे मध्याह्ने ऋषिभिस्तथा ।
अपराह्णे च पितृभिः शर्वर्यां गुह्यकादिभिः ॥ उ. ४३।९
सर्वा वेला अतिक्रम्य नक्तभोजनमुत्तमम् ।
उपवासाद्वरं भैक्ष्यं भैक्ष्याद्वरमयाचितम् ॥
अयाचिताद्वरं नक्तं तस्मान्नक्तं समाचरेत् ॥
हविष्यभोजनं स्नानं सत्यमाहारलाघवम् ।
अग्निकार्यमधःशय्यां नक्ताशी षट् समाचरेत् ॥ उ. ४३।१०-१३

३३. जगन्नाथरथयात्रावद्गंगारथयात्रापि पापकर्तृणां दुर्लभदर्शना—

रथयात्रादिने तस्मिन् विभवे सति कारयेत् ।
रथारूढप्रतिकृतिं गंगायास्तूत्तरामुखा (खी) म् ।
भ्रमन्त्या दर्शनं लोके दुर्लभं पापकर्मणाम् ॥ उ. ४३।५७

३४. गंगाविष्णुशंभूमादिषु भेदो न कर्तव्यः—

यथा शिवस्तथा विष्णुर्यथा विष्णुस्तथा ह्युमा ।
उमा यथा तथा गंगा चात्र भेदो न विद्यते ॥
विष्णुरुद्रान्तरं यश्च गंगागौर्यन्तरं तथा ।
लक्ष्मीगौर्यन्तरं यश्च प्रब्रूते मूढधीस्तु सः ॥ उ. ४३।९२-९३

३५. पौराणिकी चतुर्विधा मुक्तिः ब्रह्मज्ञानसदृशं गयाश्राद्धादि—

ब्रह्मज्ञानं गयाश्राद्धं गोगृहे मरणं तथा ।
वासः पुंसां कुरुक्षेत्रे मुक्तिरेषा चतुर्विधा ॥ उ. ४४।२०

३६. काशीमरणवद्गयाश्राद्धादि मुक्तौ प्रयोजकमिति प्रतिभाति। अथवा मुक्तिरूपमेव पुराणवचनेष्वर्थवादरीत्या भिन्नार्थकरणे महादोषश्रुतेः। गयाश्राद्धे क्षेत्रिणे बीजिने च पित्रे पिण्डदानप्रसङ्गे आदौ क्षेत्रिणे ततो बीजिनेऽयं क्रमः

स्वरिणीजो ददौ चादौ क्षेत्रिणे बीजिने ततः ॥ उ. ४६।३६

३७. गयायां स्वात्मानमुद्दिश्यापि पिण्डो देयः स च स्वमरणानन्तरं स्वात्मानं प्राप्नोति—

एष पिण्डो मया दत्तस्तव हस्ते जनार्दन।
गयाश्राद्धे त्वया देयो मह्यं पिण्डो मृते मयि ॥ उ. ४७।६३

३८. एवं जीवद्भ्यो गयायां पिण्डदाने तेभ्यस्तेभ्यो मरणानन्तरं सपिण्डो जनार्दनेन दीयते—

तुभ्यं पिण्डो मया दत्तो यमुद्दिश्य जनार्दन।
देहि देव गयाशीर्षे तस्मै तस्मै मृते ततः ॥ उ. ४७।६४

३९. काश्यां पञ्चनदे माघमासे एकदिनस्नानकरणेन प्रयागे माघमासीयस्नानफलम्—

प्रयागे माघमासे तु सम्यक्स्नानस्य यत्फलम्।
तत्फलं स्याद्दिनैकेन काश्यां पञ्चनदे ध्रुवम् ॥ उ. ५०।१९

४०. काशीस्थत्रिस्रोतः प्रभृति नदीत्रयदर्शनेन ब्रह्महत्यानिवृत्तिर्भवति—

तिस्रो नद्यस्तु तत्रत्या वहन्ति च शुभोदकाः।

तासां स्थानादिकम्—

एका तु तत्र त्रिस्रोता तथा मन्दाकिनी परा।
मत्स्योदरी तृतीया च एतास्तिस्रस्तु पुण्यदाः ॥
मन्दाकिनी तत्र पुण्या मध्यमेश्वरसंस्थिता।
संस्थिता त्रिस्रोतिका च अविमुक्तेति पुण्यदा ॥
मत्स्योदरी तु ॐकारे पुण्यदा सर्वदैव हि ॥ उ. ५०।२८-३१

संप्रति विद्यमानान्येतानि तीर्थानि पूर्वं नदीस्वरूपाणि समासन्।

४१. के तीर्थयात्राया अधिकारिणः, के च नाधिकारिणः, तीर्थयात्राप्रसङ्गे कथं वर्तितव्यम्—

या तीर्थयात्रा कथिता मुनीन्द्रैः कृता प्रयुक्ता ह्यनुमोदिता च ।
तां ब्रह्मचारी विधिवत्करोति सुसंयुतो गुरुणा संनियुक्तः ॥
सर्वस्वनाशेऽप्यथवाल्पपक्षे स ब्राह्मणानग्रत एव कृत्वा ।
यत्राधिकारेऽप्यथ वा निवृत्ते विप्रस्तु तीर्थानि परिश्रमेच्च ॥
तीर्थेष्वलं यज्ञफलं हि यस्मात्प्रोक्तं मुनीन्द्रैरमलस्वभावैः ।
यस्येष्टियज्ञेष्वधिकारितास्ति वरं गृहं गृहधर्माश्च सर्वे ॥
एवं गृहस्थाश्रमसंस्थितस्य तीर्थे गतिः पूर्वतरैर्निषिद्धा ।
सर्वाणि तीर्थान्यपि चाग्निहोत्रतुल्यानि नैवेति वदन्ति केचित् ॥
यो यः कश्चित्तीर्थयात्रां तु गच्छेत्सुसंयतः स च पूर्वं गृहेषु ।
कृतावासः शुचिरप्रमत्तः संपूजयेद्भक्तिनम्रो गणेशम् ॥
देवान् पितॄन् ब्राह्मणांश्चैव साधून् धीमान् विप्रो वित्तशक्त्या प्रयत्नात् ।
प्रत्यागतश्चापि पुनस्तथैव देवान् पितॄन् ब्राह्मणान् पूजयेच्च ॥
उ. ६२।२०-२५।

४२. यानमारुह्य तीर्थयात्रा न कर्तव्या—

ऐश्वर्यलोभमोहाद्वा गच्छेद्यानेन यो नरः ।
निष्फलं तस्य तत्तीर्थं तस्माद्यानं विवर्जयेत् ॥
गोयाने गोवधः प्रोक्तो हययाने तु निष्फलम् ॥
नरयाने तदर्द्धं स्यात्पद्भ्यां तच्च चतुर्गुणम् ॥ उ. ६२।३३-३४
नरयानमारुह्य गमने विध्युक्तफलमर्द्धं प्राप्यते, पद्भ्यां गमने तु
चतुर्गुणं फलम् ।

४३. तीर्थयात्रायां विशेषसमये दण्डच्छत्रोपानद्युक्तो यात्रां कुर्यात्—

वर्षातपादिके छत्री दण्डी शर्करकण्टके ।
शरीरत्राणकामोऽसौ सोपानत्कः सदा व्रजेत् ॥ उ. ६२।३५

४४. तीर्थे पिण्डदातव्यम्—सक्तुभिः पिण्डदानं च संयावैः पायसेन वा ।
बदरामलकैर्वापि पिण्याकैर्वा सुलोचने ! ॥ मोहिनि !
श्राद्धं तु तत्र कर्तव्यमर्चावाहनवर्जितम् ॥ उ. ६२।३९-४०
अन्यत्रार्चानिषेधो नास्ति । "अर्घ्यमावाहनं चैव"
इत्यनेनार्घ्यस्य निषेधात्

४५. गंगायमुनयोः समानार्हत्वं केवलज्येष्ठभावेन गंगा सर्वत्र पूज्यते—

गंगा च यमुना चैव उभे तुल्यफले स्मृते ।
केवलं ज्येष्ठभावेन गंगा सर्वत्र पूज्यते ॥ उ. ६२।१६७

४६. अरुणोदये स्थिता दशमी एकादशीं विध्यति परन्तु स वेधः श्रौतान् प्रति विद्यते-अन्यच्च वेधादिकं समानम्, निशीथवेधो वीरवैष्णवान् प्रति समस्ति—

स्मार्तान् सूर्योदयं प्राप्य श्रौतानप्यरुणोदयम् ।
निशीथं वैष्णवान्विप्राः प्राप्य दूषयते व्रतान् ॥
मोहिनी वेधरहितामुपोष्यैकादशीं नरः ॥
द्वादश्यां विष्णुमभ्यर्च्य वैकुण्ठं यात्यसंशयम् ॥ उ. ८२।२३-२४

—:०:—

THE SHORTER KŪRMA-VIBHĀGA TEXTS OF THE PURĀṆAS

By

C. A. Lewis

[पुराणेषु अन्येषु च ग्रन्थेषु भारतवर्षीयभूगोलवर्णनप्रसङ्गे भारतवर्षस्य कूर्मरूपेण कल्पना—भारतवर्षस्य विभिन्नप्रदेशानामवस्थितिः कूर्मस्यास्य विभिन्नाङ्गेषु निर्दिष्टा वर्तते । अयं कूर्मस्तु प्राक्शिरा वर्तते । तस्य मध्यभागे मध्यदेशस्यावस्थितिः, अग्निमदक्षिणपादे पूर्वदक्षिणदेशस्य, दक्षिणपार्श्वे दक्षिणदेशस्य, पश्चाद्दक्षिणपादे दक्षिणपश्चिमदेशस्य, पुच्छभागे पश्चिमदेशस्य, पश्चाद्वामपादे पश्चिमोत्तरदेशस्य, वामपार्श्वे उत्तरदेशस्य अग्रिमवामपादे पूर्वोत्तरदेशस्य च अवस्थितिः वर्णिता वर्तते । कूर्मविभागवर्णनं द्विविधं वर्तते—लघुविभागः बृहद्विभागश्च । लघुविभागः अथर्ववरिशिष्टे, गरुडपुराणे, विष्णुधर्मोत्तरपुराणे चोपलभ्यते । बृहद्विभागस्तु बृहत्संहितायां मार्कण्डेयपुराणे पराशरतन्त्रे चोपलभ्यते । अत्र लघुविभागस्यैव विवेचनं कृतम् । अथर्ववरिशिष्टस्य वर्णनं पुराणैः सह किञ्चिद् वैभिन्न्यं भजते । अस्मिन् कूर्मविभागवर्णने दृश्यते यत् दक्षिणदेशीयेषु जनपदेषु विन्ध्यवासिनामेव वर्णनमस्ति । अतः तस्मिन् काले विन्ध्यात् परं वर्तमानानां देशानां परिचयो नासीदार्याणामिति मतम् लेखकमहोदयस्य वर्तते । अत्र कूर्मविभागे निर्दिष्टानां जनपदानां जातीनां च प्रमाणपुरस्सरं अवस्थितिः आलोचिता, एतत्प्रकरणात्मकस्य पुराणांशस्य पाठविषयेऽपि विमर्शः कृतो वर्तते ।]

The conception of Bhāratavarṣa as a tortoise, in which the various countries are said to rest on specific parts of its body, is a well-known theme of ancient Indian geography. Each of the different parts of the animal, whose head faced towards the Bay of Bengal, and whose centre comprised Madhyadeśa, represented a different direction of which there were nine altogether. These may be listed as follows :

1. The middle = Madhyadesa.
2. The head = East.
3. The right forefoot = South-East.
4. The right side = South.

5. The right hind foot = South-West.
6. The tail = West.
7. The left hind foot = North-West.
8. The left side = North.
9. The left forefoot = North-East.

The Kūrma-vibhāga texts occur in two types of list, the longer and the shorter; the former are to be found in the Bṛhatsaṁhitā of Varāhamihira, the Mārkaṇḍeya-purāṇa and the Parāśaratantra, while the latter occur in the Pariśiṣṭa to the Atharvaveda, the Garuḍa-purāṇa, and the Viṣṇudharmottara-purāṇa. In the present article it is proposed only to deal with the shorter Kūrma-vibhāga texts. Though the Pariśiṣṭa texts follows the same framework as the shorter purāṇic lists, there is clearly no connection between the two. Moreover its Madhyadeśa is placed somewhat further to the south than is the case of the purāṇic texts and hence corresponds much more closely to the true geographical centre of India. Again while the Pariśiṣṭa extends its Madhyadeśa considerably eastwards to include Kāśī, Kosala, Mithilā etc., the purāṇic texts specifically exclude them from Madhyadeśa by making them parts of its eastern division.

The most interesting aspect of the shorter purāṇic texts, with which this article will now exclusively deal, is the fact that they mention as "southern" tribes, peoples who actually lived in the Vindhyas. Hence the inference would be that the conception of tortoise geography originated at a time when the Aryans had little or no acquaintance with the far south of India. To them the Vindhyas represented the southernmost region of which they had any detailed knowledge and so their southern list is really a Vindhya list. If one accepts this theory, then the tortoise shape does not seem as absurd as it is generally thought. If the Vindhyas represented the southernmost point of knowledge the Aryans had of Bhāratavarṣa, then the whole area north of them may be perhaps roughly compared to the shape of a tortoise.

Let us now proceed to a detailed analysis of these texts. That of the Garuḍa-purāṇa will be employed, while the variants of the Viṣṇudharmottara will be added. Any textual difficulty

that might arise, will be discussed, and then the peoples mentioned in the lists briefly identified to prove the correctness of their location within the region.

Pāñcālāḥ Kuravo Matsyā Yaudheyāḥ saPaṭaccarāḥ /
Kuntayaḥ Śūrasenāś ca madhyadeśajanāḥ smṛtāḥ //

The Vdh. P. has exactly the same text except due to a copyist's error it has Vaṭaccarāḥ for Paṭaccarāḥ. This text is interesting in that the Yaudheyas, Paṭaccaras, and Kuntis are not mentioned in the longer Kūrma-vibhāga text as peoples of Madhyadeśa, though the Yaudheyas are mentioned as a northern people by the latter (BS. XIV. 28 ; Mārk. P. 58, 47). The interesting hypothesis raised by this change of location will be discussed below where their identification with modern localities will be established to confirm their location in Madhyadeśa.

Pāñcāla. This was divided into two divisions by the Bhāgīrathī (Ganges). The capital of north Pāñcāla was Ahichattra (mod. Ramnagar) and of south Pāñcāla Kāmpilya (mod. Kampil). Its territory corresponded to mod. Farukhabad district.

Kuru. Ancient Kurukṣetra, the home of Brahmanical civilisation. Situated between the Sarasvatī on the north and the Dṛṣadvatī on the south, it accordingly corresponds to modern Thaneswar.

Matsya. Modern Jaipur. Capital Vairāṭanagara (mod. Bairat, 100 miles S-W of Delhi and 40 miles N. of Jaipur).

Yaudheya. The inclusion of this tribe in Madhyadeśa is most interesting, as the longer Kūrma-vibhāga texts place them in the northern region. The Purāṇas do not include them in their Bhuvanakośa texts. According to numismatic evidence a mint of their coins inscribed "Yaudheyānāṃ Bahudhānyake" and dated to the second century B. C. has been found near Rohitaka (mod. Rohtak). (I. H. Q. XXVII (1951). p. 197 ff). Bahudhānyaka may therefore be identified with the Hariana district of the Punjab. Their

descendants may be traced in the modern Johiya Rajputs on the banks of the Sutlej.

Paṭaccara. They have also been mentioned as a tribe of Madhyadeśa by the Bhuvanakośa texts of the Purāṇas. Dey (Geog. Dict. p. 150) identifies it with a portion of Banda district, but Agrawala's suggestion (India as known to Pāṇini, p. 62) that it should be equated with modern Pataudi seems far more likely in view of its association in the present text with the Yaudheyas.

Kunti. According to the Mahābhārata (3.292.25) they are to be located on the bank of a small river called the Aśvanadī or Aśvarathanadī, which flows into the Carmaṇvatī (mod. Chambal). This position is confirmed by the account of Sahadeva's digvijaya (M.B. 2. 28. 6), in which it is stated that Sahadeva overcame the Kuntibhojas before reaching the banks of the Carmaṇvatī.

Śūrasena. Capital Mathurā, mod. Maholi, five miles S-W of modern Mathurā.

V ṣadhvajajanāḥ padmāḥ sūtamāgadhacedayaḥ /
Kāśayaś ca videhāś ca pūrvasyāṃ Kośalās tathā //

The Vdh. P. has panna for padma; suhma for sūta, and añjana for jana. A comparative study of the longer Kūrmavibhāga texts show the correct readings to be Añjana, Padma, and Suhma. Kirfel (Bhāratavarsha, p. 24), who does not appear to notice the connection between the shorter and longer texts, wrongly retains jana for Añjana. As a result of the comparison of the two lists, the text may accordingly be restored as follows :

Vṛṣadhvajāñjanāḥ padmāḥ suhmamāgadhacedayaḥ /
Kāśayaś ca videhāś ca pūrvasyāṃ kośalās tathā //

It only remains now to identify these tribes and confirm their location in Pūrvadeśa.

Añjana. A mountain of the same name is mentioned in the gaṇapāṭha to Pāṇini (V. 3. 117). Both Dey (Geog. Dict. p. 8) and Law (Geog. Dict. p. 65) identify it

with the Suleiman range in the Punjab, but this identification cannot be valid in the present instance.

Vṛṣadhvaja. I have been unable to trace any identification for this name and would be grateful for any suggestion which may be proposed.

Padma. Dey (Geog. Dict. p. 123) mentions a Padmagiri, which he equates with Sravana Belgola, a town in Hassan district, Mysore. This cannot possibly be the same as the Padma of the present texts for its location is too far south. The Bhaviṣyapurāṇa (Indian Culture. v. 8 (1941) p. 57) mentions a river Padmā as one of the boundaries of Gauḍa, and with this the Padmas may be connected.

Suhma. Mod. Hooghly, Howrah and Burdwan districts of Bengal, as well as parts of Midnapur.

Māgadha. Patna and Gaya districts. Capitals Girivraja (Rajgir) and later Pāṭliputra (Patna).

Cedi. The longer Kūrma-vibhāga locates them in the south-east. Its capital (Śuktimatī) on the river of the same name (mod. Ken. MB.3.23.47; 1.57.32) may be located near Banda. It roughly comprised the modern Bundelkhand region S-E of the Jumna from its junction with the Chambal (I.H.Q.27 (1951) p. 250).

Kāśī. Modern Benares.

Videha. Modern Tirhut district with its capital Mithilā at Janakpur in Nepal.

Kośala Evidently Uttara-Kośala, whose capital was Śrāvastī (modern Sahet-Mahet in Oudh).

Kaliṅga-vaṅga-puṇḍrāṅgā *vidarbhā* mūlkās tathā /
Vindhyāntanilayāḥ proktāh pūrvadakṣiṇataḥ... //

The Vdh. P. has an identical text, and the tribes are so well-known in Indian geographical literature as scarcely to merit identification. The Aṅgas,

Vaṅgas and Kaliṅgas are frequently associated together in the Mahābhārata, a point that indicates their close geographical and ethnic association in the minds of the Aryans.

Kalinga. Modern Orissa.

Vaṅga One of the most important tribes in eastern India, as is shown by the fact that their name came to denote the whole province of Bengal. In epic and purāṇic texts they occupied the eastern section of the province towards the Ganges delta. Pargiter (J.A.S.B. 1897 p. 85) located them in the districts of Murshidabad, Nadia, Jessore, and parts of Rajshahi and Faridpur.

Puṇḍra. Modern Dinajpur, Rungpur and Bogra districts. Its capital, Puṇḍravardhana, is identified by Cunningham (Ancient Geog. of India (1871 ed.) p. 480) with modern Mahasthana, 7 miles north of Bogra.

Aṅga. Modern Bhagalpur district extending northwards to the Kosī river. Capital : Campā.

Vaidarbha. Modern Berar. Capitals Kuṇḍina (mod. Kundinyapura on the Wardha in Amraoti district) and later Bhojakaṭa (mod. Bhojapura, 6 miles S-E of Bhilsa).

Mūlaka. In the Vāyupurāṇa (88.177-8) this tribe is closely associated with the well-known Aśmakas. The present text however is very interesting as it sharply distinguishes between the two, locating the Mūlakas in the south-east and the Aśmakas in the south. According to Buddhist tradition the Godāvarī formed the boundary between them (Law, Geography of early Buddhism p. 21).

Pulindāśmaka-jīmūta-navarāṣṭranivāsinaḥ /
Karṇāṭa-kāmboja-ghāṭā dakṣināpathavāsinaḥ //

The Vdh. P. in place of Karṇāta-kāmboja-ghāṭā reads Karṇātakā bhojakaṭā, which is clearly the correct text as

Kāmboja is well known as the name of a northern tribe and would be completely out of place here. This passage presents a most interesting example of how textual corruption can occur. The final ka suffix of Karṇāṭakā has somehow been transferred to being a prefix of the following name which becomes Kābhoja and at once suggests the well known Kāmbojas. The final part of the word Kaṭa is changed to Ghāṭā and is made the name of a "separate" people. Of the names enumerated only one, Karṇāṭa, is included in the same division by the longer Kūrmavibhāga texts. None of the other names are even mentioned, though with the exception of the Jīmūtas all are well known. The reason for their omission lies perhaps in the fact that in the early period of tortoise geography they had a special importance as "frontier" tribes; when however the Aryan knowledge of South India increased, they may have lost their significance and so been dropped from the list.

It remains now to identify these tribes and confirm their location in Dakṣiṇāpatha.

Pulinda. The antiquity of this tribe is attested by their mention in the Aitareya-brāhmaṇa (VII.18.2), which locates them in the Vindhyas along with the Śabaras and Āndhras. According to Law (Geog. Dict. of India, p. 184), their capital, Pulindanagar is to be located near Bhilsa. Ptolemy (VII.1.64) refers to them as Polindoi Agriophagoi.

Aśmaka. Located by the Suttanipāta (P.T.S. p. 190) on the bank of the Godavari immediately south of Patiṭṭhāna (Skt. Pratiṣṭhāna, mod. Paithan).

Jīmūta. This tribe, so far as I am aware, has not been identified.

Navarāṣṭra. This tribe is definitely located near the bank of the Chambal by the digvijaya of Sahadeva in the Mahābhārata (MB. 2.28.6). Dey's identification of it with the Neogramma of Ptolemy (VII. 1.61) is inaccurate as the later city is situated on the Indus

Karṇāṭaka. Modern Kanarese speaking area centred around Mysore.

Bhojakaṭa. According to the purāṇic tradition the Bhojas were a branch of Yādavas who founded the kingdom of Vidarbha. Bhojakaṭa is mentioned in the Chammak copperplate inscription of Pravarasena III and may thus be regarded as including the Elichpur district of Berar and the area of Chammak four miles to its south-west. It has also been identified with Bhatkulī in Amroati district. (C. L. I. III, no. 55 ; line 18 ; I. A. 1923, p. 262).

Ambaṣṭha-Draviḍa-Lāṭāḥ Kāmbhoja-Strīmukhāḥ Śakāḥ /
Ānartavāsinaś caiva jñeyā dakṣiṇapaścime //

The Vdh. P. has an identical list except that it substitutes Nāga for Lāṭa and Ananta for Ānarta. Both these forms can be dismissed as copyists' errors. It accordingly remains to identify briefly these names and confirm their location in the south-western division.

Ambaṣṭha. This tribe is clearly to be identified with those of the Mahābhārata, where they are associated with the Śibis and Trigartas (MB. 2.29.6. ; 2.48.14 ; 6.18.13 etc.). They are well known in classical writers as one of the tribes conquered by Alexander the Great and are located by them on the lower Akesines (mod. Chenab). They are the Sabarcae of Curtius (IX, 8), the Sambastai of Diodorus (17, 102), and the Abastanoi of Arrian (Anab. VI. 15).

Drāviḍa. This well-known name appears out of place here. In the Mahābhārata and the Purāṇas it is generally associated with the tribes of the extreme south. Kern however, considers that a branch originally existed in Baluchistan and accordingly identifies them with the Brahui tribe who are said to belong to Dravidian stock. It is possible that their inclusion in the present division is due to "editing" on the part of copyists. Rājaśekhara (Kāvya-mimāṃsā

p. 93) mentions a country called Travaṇa in the western region and associates it with Surāṣṭra. Such a name, if little known, as would seem likely as I have been unable to trace it elsewhere, may well have been "corrected" by copyists as Drāviḍa.

तत्र वामनपुराणस्य पाठनिर्धारणविषये केचित् सिद्धान्ताः विवेचिताः । इमे सिद्धान्ताः श्रीवामनपुराणसंस्करणसंपादकेन आनन्दस्वरूप गुप्तमहोदयेन व्याख्याताः, उदाहरणार्थं कतिचित् निर्धारितपाठाश्च विदुषां समक्षे विचारार्थं प्रस्तुताः, केचित् तत्र विचारिताश्च । डा० एस० एन० शास्त्री, द्वौ च पण्डित विद्वांसौ एतत्पुराणस्य श्लोकसंख्याविषये स्वमतानि प्रकटितवन्तः यत् नारदीयपुराणवर्णनानुसारेण वामनपुराणस्य पूर्वभागे षट्सहस्रं श्लोकाः भवितुमर्हन्ति, इत्थं वेंकटेश्वर संस्करणमेव प्रमाणतः ग्राह्यं भवेत्, तथा च सरोमाहात्म्यस्य २७ अध्याया अपि ग्राह्याः भवन्तु इति । यद्यपि बंगला-दक्षिणभारतीयहस्तलेखेषु मुख्यपाठे अध्याया इमे अगृहीताः सन्ति । अपरश्च डा० आर० के० शर्मा तु हस्तलेखानामपि प्रमाण्यं सुविचार्य ग्राह्यं भवेदिति स्वमतं प्रकटितवान् ।

एतान् विदुषः प्रति तेषाम् उपयोगिविचाराय सहयोगाय च वयं कृतज्ञाः स्म ।

VISIT OF THE JAGADGURU SRI SANKARACHARYA OF SRINGERI

His Holiness Jagadguru Sri Sankaracharya of the Śāradā Pīṭha, Sṛingerī Maṭha, Mysore, visited the Ramnagar Fort in the evening of May 3 on the occasion of his visit to Varanasi. His Highness Maharaja Dr. Vibhuti Narain Singh welcomed the distinguished guest. His Highness also performed the *pāda pūjā* of the *Pādukās* (Sandals) with the help of the Pandits of the Sṛingerī Maṭha. Pt. Rajesvara Sastri was also present. After the Pāda-pūja the *prasāda* was distributed and blessings were given by His Holiness. His Holiness was also pleased to bless the young Mahārājakumār who was in his *Brahmacāri-vesha*, whose *Yajñopavīta* ceremony had been performed a few months before.

The Kashiraj Trust presented a set of its twelve publications to His Holiness as a mark of respect. In his letter of June 17, 1967 the Private Secretary to His Holiness acknowledges the receipt of these publications and further writes that 'His Holiness is immensely glad to find that the Purāṇa Department of the Kashiraj Trust has done very useful work'.

The Nandī-Nāgarī Manuscript of the Vāmana-Purāṇa was procured by us from the Śṛingerī Maṭha Library. The Trust is very much grateful to His Holiness for his generous help and co-operation, and hopes that the same will be available to the Trust in future also.

DISTINGUISHED VISITORS AND GUESTS :

Dr. Juan Roger Rivieri Professor of Indology, Madrid University, Spain, and Mrs. Rivieri visited the Purāṇa Department on January 6, 1967 and appreciated its work.

Dr. H. Von Stietencron, South Asia Institute, University of Heidelberg, Germany, also visited the Purāṇa Department. He writes 'The Trust is doing most useful work, which is specially important for every scholar dealing with Purāṇic studies.'

शारदापीठस्य जगद्गुरु श्रीशंकराचार्याणां समागमनम्

महोदयाः शृंगेरीमठस्थशारदापीठस्य श्रीशंकराचार्याः स्ववाराणसीयात्राक्रमे रामनगरदुर्गेऽपि मई ३ दिनाङ्के समागताः, स्वागतं च तेषां काशिराज डा० विभूतिनारायणसिंह द्वारा विशेषातिथिरूपेण कृतम्। शृंगेरिमठस्य पण्डितानां सहयोगेन काशिराजेनापि पादुकयोः पादपूजा विहिता। तस्मिन्काले पं राजेश्वर शास्त्रिणोऽपि उपस्थिता आसन्। पादपूजायाः अनन्तरं प्रसादवितरणं जातम्, आशीर्वादाश्च काशिराजाय प्रदत्ताः। ब्रह्मचारिवेषधारिणे कृतयज्ञोपवीताय (मासान्पूर्वं) शिशवे महाराजकुमाराय आशीर्वादान् दत्वा अति प्रसन्नाः बभूवुः श्रीशंकराचार्याः।

काशिराजन्यासः स्वप्रकाशितान् द्वादशग्रन्थान् जगद्गुरु श्रीशंकराचार्याय बहुमानप्रदर्शनपुरःसरं समर्पितवान्। श्रीशंकराचार्यस्य व्यक्तिगत सचिवमोदय १७ जूनतिथौ प्रेषिते पत्रे प्रकाशनप्राप्तिमङ्गीकरोति, लिखति च "श्रीशंकराचार्य महोदयाः काशिराजन्यासस्य पुराणविभागद्वारा सम्पाद्यमानं उपयोगिनं कार्यं दृष्ट्वा अत्यन्तं मोदमनुभवन्ति' इति।

शृंगेरिमठादेव अस्माभिः वामनपुराणस्य नन्दीनागरीलेखः समुपलब्धः। श्रीशंकराचार्यकृतसहायतायै सहयोगार्थं च न्यासः कृतज्ञतां अभिव्यनक्ति, आशास्ते च भविष्येऽपि तादृक् एव सहायादिकं दास्यते।

विशिष्टा अतिथयः दर्शकाश्च

अस्मिन् वर्षे जनवरीमासस्य षष्ठतिथौ माद्रिद् (स्पेन) विश्वविद्यालयस्य भारतीय विद्याविभागाध्यक्षो श्री ज्वान रोजर रिवीरि महाशयः, तथा ओस्लो विश्वविद्यालयस्य महाशयाऽपि पुराणविभागं दृष्टवन्तौ, प्रशंसितवन्तौ च कार्यजातमस्य।

डा० एच० वान स्टीटेन्क्रोन जर्मनीदेशस्य हेडेलबर्ग विश्वविद्यालये दक्षिण एशिया संस्थायाः अधिकारी पुराणविभागमत्र दृष्टवान्। अयं लिखति "न्यासोऽयं महद् उपयोगि कार्यं करोति, शोधकार्यसंलग्नानां पुराणानामध्ययने दत्तचित्तानां विदुषां कृते एतत्सर्वं विशेषेण उपयोगाय कल्पते इति।

The following distinguished persons were the guests of His Highness Maharaja Vibhuti Narain Singh who were acquainted with the activities of the Trust and were presented the latest volume of the Purāṇa bulletin and other presentation pamphlets :—

1. Dr. Juan Roger Rivieri Professor of Indology, Madrid University, Spain and Mrs. Rivieri.
2. Shri Gaj Raj Singh, I.A.S. ; Managing Deputy Director, Tourism.
3. Shri M.C. Desai ; Chief Justice, Allahabad High Court.
4. Dr. C. D. Deshmukh, and Shrimati Deshmukha.
5. Shri V. Jha, Foreign Secretary, Govt. of India, New Delhi.
6. Shri S. C. Datt ; Prof., Mayo College, Ajmer.

The South Indian Tourist Beureau

The tourist office of the Trust is working as usual and this year about 575 pilgrims were attended to. The Trust has also arranged for the fecility of accomodation for the pilgrims to perform Śrāddha ceremony at their Shivala House and many pilgrims who visited Varanasi availed of this fecility.

A Kīrtan party of about 200 persons visited Varanasi and were accomodated at Shivala House. They arranged for their Kīrtanas (devotional songs) for the general public and there was a good response from the Public of Banaras.

During this period we lost the Librarian of our Purāṇa Dept., Shri Ranganath Pandey, whose sad and untimely demise occured on May 1. He was a very sincere and silent worker. We pray for the peace of the departed soul.

अद्योनिर्दिष्टाः विशिष्टा जनाः स्ववाराणस्यागमनप्रसङ्गे महाराज काशिनरेशस्य अतिथयोऽभवन्, काशिराजन्यासस्य कार्याणां च परिचयं अलभन्त, पुराणपत्रिकायाः अन्तिमो अंकः अन्यानि च देयानि पत्राणि तेभ्यः समर्पितानि :—

१. डा० जुअन रोजर रीविरो, विभागाध्यक्षः भारतीयविद्यायाः, मद्रिद विश्वविद्यालयस्य (स्पेन), श्रीमती रीविरो महोदया च सहचारिणी अभवत्।

२. श्रीगजराज महोदयः, आइ. ए. एस. मैनेजिंग डिप्टी डाइरेक्टर टूरिज्म।

३. श्री एम. सी. देशाई महोदयः, चीफ जस्टिस, इलाहाबाद हाईकोर्ट।

४. डा. सी. डी. देशमुखः, श्रीमती देशमुखमहोदया च।

५. श्री वी. झा महानुभावः, विदेशसचिवालयस्य गवर्नमेन्ट आफ इण्डिया, देहली।

६. श्री एस. सी. दत्त महाशयः, प्रोफेसर, मेयो कालेज, अजमेर।

दक्षिणभारतीय—यात्रिविभागः

काशिराजन्यासस्य यात्रिविभागः सामान्यतः प्रचलति। अस्मिन् वर्षे प्रायः ५७५ यात्रिण अत्र उपस्थिता अभवन्। श्राद्धसंस्कारोद्देश्येन काश्यां समागतानां यात्रिणां निवासाय न्यासेन शिवालाभवने प्रबन्धः कृतः। एतेन बहवश्च यात्रिणः लाभान्विताः बभूवुः।

कीर्तन मण्डलं २०० व्यक्तीनां अत्र समागच्छत् शिवाला भवने च न्यवसत्। साधारणजनतायै तैः कीर्तनादिकं व्यवस्थापितमासीत, काशीवासिनां उपस्थितिश्च तत्र प्राचुर्येण समभवत्।

अत्रान्तरे पुराणाविभागस्य पुस्तकालयाधिकारिणः श्रीरंगनाथपाण्डेयस्य अकाले स्वर्गवासः मईमासस्य १ तिथौ संजातः, सुयोग्यतमः असौ विश्वसनीयः कार्यकुशलः सर्वेषां प्रीतिभाजनमभवत्। तस्य आत्मनः शान्त्यै वयं प्रार्थयामः।

अन्य—

[1]मासि मासि च रेवत्यां ब्राह्मणान् घृतपायसान् ।
सदक्षिणं भोजयित्वा रूपभागभिजायते ॥ १ ॥
कृत्तिकासु महाभागाः पायसेन ससर्पिषा ।
सन्तर्प्य ब्राह्मणान् साधून् लोकानाप्नोत्यनुत्तमान् ॥ २ ॥
रोहिण्यां प्रथितैर्मा (मां) सैर्मार्गै[2] र्याम्येन[3] (१)सर्पिषा ।
पयोऽन्नपानं दातव्यमानृण्यार्थं द्विजातये ॥ ३ ॥
दोग्ध्रीं दत्वा सवत्सां तु नक्षत्रे सोमदैवते ।
स गच्छेन्मानुषाल्लोकात् स्वर्गवासमनुत्तमम् ॥ ४ ॥
आर्द्रायां कृषरं दत्वा तिलमिश्रमुपोषितः ।
नरस्तरति दुर्गाणि क्षुरधारांश्च पर्वतान् ॥ ५ ॥
[4]पुनर्वसौ यवान्[5] दत्वा तथैव द्रोणि[6] शोभने ।
यशस्वी रूपसंपन्नो बहुले[7] जायते कुले ॥ ६ ॥

१. स्व. म. ११. १ = च. चि. पृ. ८८१. प. ५, ६; कृ. कल्प. पृ. २४१ प. ६, ७.
,, ,, ,, २—५ = म. भा. १३, ९९.५-८.
वि. धर्मो. ३. ३१८. २-५.
कृ. कल्प. पृ. २४१. प. ९ to २४२. ४.
च. चि. पृ. ८७६ प. ६ to १४.

२. मार्गैः मृगसंबन्धिभिः मांसैः ।

३. 'याम्येन'—अस्फुटोऽर्थः । म. भा., वि°. धर्मो°, च. चिः—'अग्नेन' इति पाठः । कृ. क. 'यत्नेन' इति ।

४. स्व. म. ११-६—१०. = च. चि. पृ. ८७६. प. १५
,, ८७७ ,, ८.
कृ. कल्प. पृ. २४२. प. ५—१४.
वि. धर्मो. ३. ३१८. ६—१०.
म. भा. १३.९९. ९—१३

५. यवस्थाने पूपान् अपूपानिति म. भारते, कृ. कल्पतरौ, वि° धर्मो°, च. चि. ।

६. द्रोणि इति दुष्टः शब्दः पाठश्च । 'अन्नानि' इति पूर्वोद्दिष्टेषु ग्रन्थेषु ।

७. 'बह्वन्ने' इति कृ. क.; च. चि. पाठः ।

पुण्ये तु कनकं दत्वा कृतं चाकृतमेव च ।
अनालोकेषु लोकेषु सोमवासे[८] विराजते ॥ ७ ॥

आश्लेषायां तु यो रौप्यं वृषभं वा प्रयच्छति ।
स सर्वभयनिर्मुक्तः शास्त्रवानभिजायते ॥ ८ ॥

मघासु तिलपूर्णानि वर्धमानानि मानवः ।
प्रदाय पुत्रपशुमान् नित्यं प्रेत्य प्रमोदते ॥ ९ ॥

फाल्गुने पूर्वसमये ब्राह्मणं समुपोषितम् ।
[९]भक्त्यान्नपानसंयुक्तं कृत्वा सौख्यं स गच्छति ॥ १० ॥

[१०]घृतक्षीरसमायुक्तं द्विवर्ष[११]षष्टिकोदनम्[१२] ।
उत्तराविषये दत्वा स्वर्गलोके महीयते ॥ ११ ॥

यद्यत्प्रदीयते दानमुत्तराविषयेण वै ।
महाफलमनन्तं च भवतीति विनिश्चयः ॥ १२ ॥

हस्ते हस्तिरथं[१३] दत्वा चतुर्भोज[१४]मुपोषितः ।
प्राप्नोति परमाँल्लोकान् पुण्यकाल[१५]समन्वितान् ॥ १३ ॥

८. 'सोमवत् स' इति समीचीनः पाठः पूर्वोद्दिष्टेषु ग्रन्थेषु ।
९. 'भक्त्या' इत्यस्य स्थले 'भक्ष्य' इति सर्वत्र ।
१०. स्व. म. ११. ११—१५ = च. चि. पृ. ८७७. प. ९ to
,, ८७८. ,, २.
कृ. क. पृ. २४३. प. १—१२.
वि. धर्मो. ३. ३१८. ११—१५.
म. भा. १३—९९. १४—१८.
११. 'विधिवत्' इति अन्यत्र पाठः । किंतु द्विवर्षशब्दोऽपि साधुः, वर्षत्रयाभिरक्षितान् शालीन् लक्षयति ।
१२. षष्टिदिनैः पच्यमानाः शालयः षष्टिकाः ।
१३. हस्तियुक्तं रथम् ।
१४. 'चतुर्युक्तम्' इत्यन्यत्र । कृ. कल्पतरौ, च. चि. 'चतुर्भिः हस्तिभिः संयुक्तमित्यर्थो दत्तः ।'
१५. 'काम' इति म. भारते शुद्धः पाठः ।

चित्रायामूषभं[16] दत्वा पुण्यान् गन्धांश्च वै मधु ।
चरत्यप्सरसां लोके वसते वत्सरान् शतान् ॥ १४ ॥

स्वात्यां चैव धेनुं[17] दत्वा यदिष्टमिष्टमात्मनः ।
प्राप्नोति लोकांश्च शुभानिह चैव महद्यशः ॥ १५ ॥

[18]विशाखायामनड्वाहं धेनुं दत्वा च दुःखहाम्[19] ।
सम्(प्रा)सङ्गं[20] च शकटं सधान्य (न्यं)वस्त्रसंयुतम् ॥ १६ ॥

पितॄन् देवांश्च प्रीणाति प्रेत्य चामृतमश्नुते ।
अनुराधासु प्रावारं वस्त्रोत्तरमुपोषितः ॥
दत्वा युगशतं वापि नरः स्वर्गे महीयते ॥ १७ ॥

कालशाकं च विप्रेभ्यो दत्वा मर्त्यः समूलकम् ।
ज्येष्ठायां शिष्टमिष्टं[21] वा गतिमिष्टां स गच्छति ॥ १८ ॥

मृगे(मूले)तु मूलकं दत्वा ब्राह्मणेभ्यः समाहितः ।
पितॄन् सम्यं प्रीणयति गतिमिष्टां स गच्छति ॥ १९ ॥

अथवा पूर्वाषाढासु दधिपात्राण्युपोषितः ।
कुलवृत्तोपसंपन्ने ब्राह्मणे वेदपारगे ॥ २० ॥

१६. 'वृषभम्' इति सर्वत्र । पूर्वापरसङ्गत्या च स एव समीचीनः पाठः ।

१७. 'धनम्' इति सर्वत्र साधुः पाठः ।

१८. स्व. म. ११. १६-२० = च. चि. पृ. ८७८. प. ३—१६.
कृ. कल्प. पृ. २४३. प. १३ to
२४४ ,, ६.
वि. धर्मो. ३. ३१८. १६—२२.
म. भा. १३. ६६. १६—२५.

१९. 'दुग्धदाम्' इति सर्वत्र ।

२०. प्रासङ्गः द्वितीयं युगकाष्ठम् ।

२१. 'ऋद्धिमिष्टां' इति म. भा., वि. धर्मो । 'मृत्युमुत्साद्य' इति च. चि ।

[22]प्रदाय जायते प्राज्ञः कुलेषु बहुशो (?) कुले[23] ।
उद [क] सक्तुं ससर्पिष्कं प्रभूतं मधुफाणितम् ॥ २१ ॥
दत्वा चोत्तराषाढासु सर्वान् लोकानवाप्नोति (?)[24] ।
श्रवणे कम्बलं दत्वा वस्त्रान्तरितमेव च ॥ २२ ॥
एतेन याति दानेन[25] सर्वलोकान् समुद्धृतान्[26] ।
गोप्रयुक्तं धनिष्ठासु यानं दत्वा समाहितः ॥ २३ ॥
[27]वस्त्ररश्मिधरश्चैव स तु राज्यं समश्नुते ।
दुग्धान्(गन्धान्)शतभिषा योगे दत्वा सागरुचन्दनान् ॥२४॥
प्राप्नोति परमान् लोकान् प्रेत्य दुग्धांश्च(गन्धांश्च)शाश्वतान् ।
पूर्वभाद्रपदा योगे राजमाषान् प्रदापयेत् ॥ २५ ॥
[28]सर्वभक्ष्यरसोपेतः सर्वः(सर्वै)प्रेत्य सुखी भवेत् ।

२२. स्व. म. ११. २१—२५ = च. चि. पृ. ८७८. प. १६ to
" ८७६. " १३.
कृ. कल्प. पृ. २४४. प. १० to
२४५ " ६
वि. धर्मो. ३. ३१८. २३—२८.
म. भा. १३. ६६. २६—३१.

२३. अत्र विविधः पाठः । म. भारते 'कुले सबहुगोधने'; वि. धर्मो. 'कुले स बहुगोकुले'; कृ. कल्प, च. चि, 'कुले बहुगुणाकुले' इति ।

२४. अत्र अभिजिद्विषयकः श्लोकः अधिकतया म. भा., कृ. क., च. चि., वि. धर्मो. च दृश्यते ।

२५. 'श्वेतेन याति यानेन' इति सर्वत्र ।

२६. 'असंवृत्तान्' 'सुसंयतान्' इति अन्यत्र ।

२७. 'वस्त्रराशिधनम्' म. भारतपाठ उपादेयो भाति । अन्यत्र प्रायो विविधोऽपपाठः ।

२८. स्व. म. ११. २६—२८ = च. चि. पृ. ८७६. प. १४ to
८८०. " २.
कृ. कल्प. पृ. २४५. प. ७—१५.
वि. धर्मो. ३. ३१८. २६—३२.
म. भा. १३. ६६. ३२—३५.
स्व. म. ११. २६, ३० = च. चि. पृ. ६७६. प. १३—१६.
कृ. कल्प. पृ. २४६. ३—६.

[28]प्रवृत्ते तूत्तरायोगे[30] यस्तु मांसं प्रयच्छति ॥ २६ ॥
[31][स पितॄन् प्रीणयति वै प्रेत्य चानन्त्यमश्नुते ।
[32]कांस्योपदोहनां धेनुं रेवत्यां यः प्रयच्छति ।]
स प्रेत्य मांसान्(कामान्)आदाय दातारमुपगच्छति ॥२७॥

रथमश्वसमायुक्तं दत्वाश्विन्यां नरोत्तमः ।
हस्त्यश्वरथसंपन्ने धर्मिष्ठे जायते कुले ॥ २८ ॥

भरणीषु द्विजातिभ्यः नीलां[33] धेनुं समर्पयेत् ।
गां च प्रसूतामाप्नोति नरः प्रेत्य यशस्तथा ॥[34] २९ ॥

[35]अन्नदानं महादानं सर्वदानाधिकं स्मृतम् ।
अन्नादि[36]त्राण[37]जननं नॄणां सञ्जायते सदा ॥ ३० ॥

प्राणाप्यायनमात्रं तु यो विप्राय प्रयच्छति ।
दुर्भिक्षे तु विशेषेण स लभेच्चाक्षयादिकम् ॥ ३१ ॥

[38]कृत्वा तु पातकं कर्म यो दद्यादन्नमीप्सितम् ।
ब्राह्मणानां विशेषेण सन्निहत्यात्मनस्तु सः ? ॥[39] ३२ ॥

२९. 'औरभ्रम्' इति सर्वत्र । एतच्च मांसमित्यस्य विशेषणम् ।
३०. अत्र उत्तराशब्दस्य 'उत्तरा भाद्रपदा' इत्यर्थः ।
३१. फलवाचकं त्वर्धं कोशे लुप्तम्; उपरि उद्धृतं म. भारतात् ।
३२. रेवतीनिर्देशेन दानविधायकमर्धं च लुप्तं, म. भारतादुद्धृतम् ।
३३. 'तिल' इति. म. भा, कृ. क, च. चि ।
३४. नक्षत्रदानमत्र समाप्तम् ।
३५. बृहस्पत्युक्तत्वेन कृ. कल्प १६; च चि. ९७९.
३६. 'अन्नाद्धि' कृ. कल्प., च चि. ।
३७. 'प्राण' कृ. कल्प., च. चि. ।
३८. स्व. म. ११. ३१. = च. चि. पृ. ९७९. प. १८ to
९८०. ,, ८.
कृ. कल्प. पृ २४६. प. १५.
२४७. ,, १०.
३९. स निहन्त्यात्मनोऽयशः—कृ. कल्प. स निहन्त्यात्मनस्तमः ।

दुर्लभस्त्वन्नदाता च मुदा भोक्ता च दुर्लभः ।
मुदा दाता च भोक्ता च तावुभौ स्वर्गगामिनौ ॥ ३३ ॥

योऽन्नं बहुमतं भुङ्क्ते यश्चान्नं नावमन्यते ।
यश्चान्नं प्रीतितो दद्यात्तस्यान्नमुपतिष्ठति ॥ ३४ ॥

प्रीतितोऽन्नं च यो दद्याद् गृह्णीयाद्योऽभिपूज्य च ।
प्रीतितोऽक्षयमाप्नोति पूजितः स्वर्गमश्नुते ॥ ३५ ॥

यो दद्यादपि नान्नं[४०] च यश्चान्नं नाभिनन्दति ।
तावुभौ नरके मग्नौ वसेतां शरदां शतम् ॥ ३६ ॥

[४१]भोजयित्वा दश शतान् नरो वेदविदो द्विजान्[४२] ।
न्यायविद्धर्मविदुषो स्मृतिशास्त्रविदस्तथा ॥ ३७ ॥

न याति नरकं घोरं संसारं च न सेवते ।
[४३]पतेद् ब्राह्मणमन्नं तु भुक्तमन्नं यदा गृही ॥ ३८ ॥

अवन्ध्यं दिवसं कुर्यादन्नदानेन मानवः ।
भैक्षेना(णा?)न्नं समाहृत्य विप्रेभ्यो यः प्रयच्छति ॥ ३९ ॥

स्वाध्यायनिरतो विप्रः तदेव फलमश्नुते ।
[४४]कुटुम्बं पीडयित्वा तु (पि) ब्राह्मणाय महात्मने ॥ ४० ॥

४०. यो दद्यादप्रियेणान्नम्—कृ. कल्प. च. चि।
४१. स्व. म. ११. ३६ to = च. चि. पृ. ६८३ प २१ to
३६१,२ १८४ ,, ५.
कृ. कल्प. पृ. २४७ प. १६ to
२४८ ,, १.
,, ,, ११. ३६.३,४. to ४० = कृ. कल्प. पृ. २४८ प. ७—१०
३६३,४, ४०१,२ = च. चि. पृ. ६७४ प. १३, १४.
,, ,, ,, ४०३,४ = ,, ,, ,, ६८४ प. १२.
४२. एतत्प्रघट्टकश्लोकाः महाभारतादिति कृ. कल्प., ब्रह्मवैवर्तादिति च. चि. ।
४३. 'यतेत ब्राह्मपूर्वं तु भोक्तुमन्नं सदा गृही' इति समीचीनः पाठः-कृ. कल्प. ।
४४. म. भारते दानधर्मादिति च. चि. पृ. ६७४.

दातव्यं भिक्षितायान्नमात्मनो भूतिमिच्छता ।
[४५]अन्नाद्भूतानि जातानि देवाश्चान्नाभिकाङ्क्षिणः ॥ ४१ ॥

[४६]न तस्य पात्रादिविधिं(धिः)विना श्राद्धं प्रकीर्तितम् ।
अपि कीटपतङ्गानामपि चाण्डालयोनिनाम् ॥ ४२ ॥

दत्त्वान्नं लोकमाप्नोति प्राजापत्यं समाहितः ।
बान्धवेभ्योऽतिथिभ्योऽन्नं पुत्रेभ्यो[४७]ऽन्नं प्रयच्छतः ॥ ४३ ॥

दीनान्धकृपणानां च स्वर्गः स्यादन्नदायिनाम् ।
[४८]ग्रामे तु विफलं ह्येतद्विधिवत् परिकीर्तितम् ॥ ४४ ॥

एतद्देवायने[४९] प्रोक्तं द्विगुणं पुण्यगौरवम् ।
[५०]धर्मार्थिकाममोक्षाणामारोग्य(ग्यं) साधनं यतः ॥ ४५ ॥

स तस्यारोग्यदानेन नरो भवति सर्वदः ।
[५१] आरोग्यं चापि कुरुते– –दैवे परिच्छदः ॥ ४६ ॥

४५. नन्दिपुराणादिति च. चि. पृ. ६८४.

४६. स्व. म. ११. ४१—४३१,२ = च. चि. पृ. ६८४. प. १३—१७.
कृ. कल्प. पृ. २४८. ,, ११—१६.
,, ,, ११. ४३३,४, ४४१,२ = च. चि. पृ. ६८४. ,, २० b)
,, ,, ६८५ ,, १.
कृ. कल्प. पृ. २४६. ,, १, २.
,, ,, ,, ४४३,४, ४५. च. चि. ,, ८६३. ,, १-३.
कृ. कल्प. ,, २५०. ,, ३-५.

४७. 'विप्रेभ्यः' कृ. कल्प; 'मित्रेभ्यः' च. चि.

४८. 'ग्रासे ग्रासे फलं' इति कृ. कल्प; च. चि.

४९. 'एतदेव अयने' कृ. कल्प; 'एतद्देवाय ते' च. चि.

५०. अत आरभ्य आरोग्यदानम् । कृ. कल्प. १७.

५१. 'आरोग्यशालां कुरुते महौषधपरिच्छदाम्' कृ. कल्प., च. चि.

[५२]वैद्यस्तु शास्त्रवित् प्राज्ञः नूनौषधपराक्रमः[५३] ।
औषधिमूलपूर्णज्ञः[५४] स्मरन् कालविधिं तथा ॥ ४७ ॥

रसवीर्यविपाकज्ञः नालि(शालि)मांसौषधिगणान्(णे?) ।
योगविद्देहिनां प्रेत्य[५५] यो धीमान् प्रविशेद् बुधः ॥ ४८ ॥

व्याधितं नीरुजीकृत्य अप्येकं करुणायुतः ॥
प्रयाति ब्रह्मसदनं कुलसप्तकसंयुतम् ॥ ४९ ॥

अल्पवित्तानुसारेण दरिद्रः फलभाग्भवेत् ।
यस्तु स्वल्पाद्युपायेन मोक्षयेद्व्याधिपीडितम् ॥ ५० ॥

सोऽपि याति शुभान् लोकान् यथेष्टान् यज्ञयाजिभिः ।
[५६]भूताभयप्रदैर्दत्तं गोसहस्रं सदक्षिणम् ॥ ५१ ॥

५२. स्व. म. ११. ४६, ४७ = च. चि. पृ. ८९३. प. ५ to ८
,, ,, ,, कृ. कल्प. ,, २५०. ,, ७—१०.
,, ,, ४८. = च. चि. ,, ८९३. ,, २०—२१.
कृ. कल्प. ,, २५१. ,, ९, १०.
,, ,, ४९१,२ = च. चि. पृ. ८९४. , १.
कृ. कल्प. ,, २५१. ,, ११.
,, ,, ४९३,४ = च. चि. ,, ८९४. ,, ६, ७.
,, ,, ५०१,२ = कृ. कल्प. ,, २५१. ,, १६, १७.
,, ,, ५०. ३. = च. चि. ,, ९४६. ,, १३१.
कृ. कल्प. ,, २५२. ,, ६१.
,, ,, ५०. ४. = च. चि. ,, ९४६. ,, १९२.
कृ. कल्प. ,, २५२. ,, १२२.

५३. दृष्टौषधपरायणः (पराक्रमः) कृ. कल्प. च. चि.

५४. 'मर्मज्ञः' 'वर्णज्ञः' कृ. कल्प. च. चि.

५५. 'देहं' कृ. कल्प., च. चि.

५६. अत आरभ्य अभयदानम् । कृ. कल्प. १८.

[५७]यज्ञदानतपांसि च परत्रेह च भूतये ।
भवन्ति तस्य यस्यार्थे रक्षणेनापि मानसम् ॥ ५२ ॥
[५८]रागाद्द्वेषाद्भयाद्वापि सन्त्यजेद्यो विपद्गतम् ।
ब्रह्महत्यासमं तस्य पापमाहुर्मनीषिणः ॥ ५३ ॥
प्राणिनं हन्यमानं हि यः शक्तः समुपेक्षते ।
प्रयाति नरकं घोरमिति प्राहुर्मनीषिणः ॥ ५४ ॥
चतुस्सागरपर्यन्तां यो दद्यात्पृथिवीमिमाम् ।
मर्त्येभ्यो योऽभयं दद्यात्ततोप्यभयदोऽधिकः ॥ ५५ ॥
[५९]विनष्टः पश्यतो यस्य(या)रक्षितः शरणागतः ।
आदाय सुहृदं(सुकृतं)तस्मात् स्वर्गं गच्छति रक्षिता(त्यरक्षितः)॥ ५६॥
[६०]छत्रदो[६१]गृहमाप्नोति गृहदो नगरं तथा ।
उपानहः प्रदानेन रथमाप्नोत्यनुत्तमम् ॥ ५७ ॥

५७. स्व. म. ११. ५१, ५२ = च. चि. पृ. ६४७. प. ३—४.
कृ. कल्प. ,, २५३. ,, १ – ५.
,, ,, ,, ५३, ५४ = च. चि. ,, ६४७. ,, १२—१५.
कृ. कल्प. ,, २५३. ,, ७. १०.
,, ,, ,, ५५ = च. चि. ,, ६४८. ,, ३, ४.
कृ. कल्प. ,, २५४. ,, २. ३.

५८. श्लोकौ ५२, ५३ महाभारतादिति कृ. कल्प., श्लो. ५२ तथा च. चि. पृ.६४७. श्लोकौ ५२, ५३ दृश्यतां रामायणे युद्ध°

५९. इत आरभ्य ५ श्लोका रामायणादिति कृ. कल्प., च. चि., दृश्यन्ते चैते तत्र युद्ध° १८. २७—३१; स्व. म. श्लो. ३०-३१ एवोद्धृतः ।

६०. स्व. म. ११. ५६$_{१,२}$ = च. चि. पृ. ६२७. प. ५.
कृ. कल्प. ,, २५८. ,, १७.
,, ,, ,, ५६$_{३,४}$ = ,, ,, ,, ,, ,, १८.
,, ,, ,, ५७$_{१,२}$ = च. चि. ,, ६३६. ,, १०.
कृ. कल्प. ,, २५८. ,, १६.
,, ,, ,, ५७$_{३,४}$ to ६० = कृ. कल्प. पृ. २६६ प. १ [illegible]५, ११, १२.

६१. इतः परं नानादानानि । कृ. कल्प. प्रकीर्णदानानि, पृ. २५८—६. तत्र यमादिति ।

इन्धनानां प्रदानेन दीप्ताग्निरिव जायते ।
गवां घासप्रदानेन सर्वपापैः प्रमुच्यते ॥ ५८ ॥

रुक्मदः सर्वमाप्नोति आरोग्यं[६२] रूपमुत्तमम् ।
वासोदः चन्द्रमो लोकं सूर्यलोकं गुडप्रदः ॥ ५९ ॥

राजोपकरणं दत्वा वस्त्राणि विविधानि च ।
नगरं च तथा दत्वा राजा भवति भूतले ॥ ६० ॥

गोरसानां प्रदानेन तृप्तिमाप्नोत्यनुत्तमाम् ।
तथा घृतप्रदानेन दीर्घं विन्दति जीवितम् ॥ ६१ ॥

[६३]नानाविधानि द्रव्याणि धनानि विविधानि च ।
आयुःकामेन देयानि स्वर्गं चाक्षयमिच्छता[६४] ॥ ६२ ॥

वस्त्रदाता सुवेशः स्याद्रूप्यदो रूपमुत्तमम् ।
हिरण्यदो महावृद्धिं दीर्घमायुश्च विन्दति ॥ ६३ ॥

फलमाल्यानि पानानि शाकानि विविधानि च ।
यानानि दत्वा विप्रेभ्यः मुदा युक्तः सदा भवेत् ॥ ६४ ॥

औषधं स्नेहमाहारं रोगिणे रोगशान्तये ।
ददानो रोगरहितः सुखी दीर्घायुरेव च ॥ ६५ ॥

ताम्बूलं चैव यो दद्याद् ब्राह्मणेभ्यो विचक्षणः ।
मेधावी सुभगः प्राज्ञो दर्शनीयश्च जायते ॥ ६६ ॥

[६७]गुडमिक्षुरसं चैव लवणं व्यञ्जनानि च ।
सुरभीनि(णि?) च पानानि दत्वात्यन्तं सुखी भवेत् ॥ ६७ ॥

६२. 'रूप्यदः' इति कृ. कल्प. पाठः ।
६३. स्व. म. ११.६१-६५. = कृ-कल्प. पृ. २५९. प १४, १५, १७, १८.
,, २६०. ,, १–४, १२, १३.
६४. संवर्तादिति कृ. कल्प. पृ. २५९-६०.
६५. स्व. म. ११.६६ = कृ. कल्प. पृ. २६० प. १४, १५.
,, ,, ,, ६७१-६ = ,, ,, ,, २६२ ,, १२, १३, १४,

[६६]देवतापुष्पदानेन जायते श्रीसमन्वितः ।
ऊर्धां(र्ध्वां?) गतिमवाप्नोति यश्च धूपप्रदो नरः ॥
लोके प्रकाशो भवति चक्षुष्मानपि दीपदः ॥ ६८ ॥

इति स्वल्पमत्स्यपुराणे.....दानविधौ
एकादशोऽध्यायः ॥

६६. यमादिति कृ. कल्प. पृ. २६२.

मत्स्य उवाच—

दानपात्रमथो वक्ष्ये यथा यज्ञे प्रशस्यते ।
यथा स्नानेऽन्नदाने च हव्ये कव्ये विशेषतः ॥ १ ॥

[1]किंचिद्धे[2]मयं[3] पात्रं किंचित्पात्रं तपोमयम् ।
पात्राणामपि तत्पात्रं शूद्रान्नं यस्य नोदरे ॥ २ ॥

[4]श्रोत्रियाय दरिद्राय अतिथिने[5] विशेषतः ।
यद्दानं दीयते तस्मै तद्दानं श्रुतकारकम् ॥ ३ ॥

[6]षट्कर्मनिरतो विप्रः श्रोत्रियो ग्राम[7]धर्मवित् ।
वेदवेदाङ्गतत्त्वज्ञः शुद्धात्मा पापवर्जितः ॥ ४ ॥

[8]सुमहद्ब्राह्मणे[9] दानं द्विगुणं ब्राह्मणब्रुवे ।
प्राधीते शतसाहस्रमनन्तं वेदपारगे ॥ ५ ॥

१. स्व. म. १२.२, ३ = कृ. कल्प. पृ. २८ प. ११, १२, १४, १५.

,, ,, ,, ४ = [,, ,, ,, ३१ ,, ६, ७
च. चि. ,, २६. ,, १५, १६

,, ,, ,, ५ = [कृ. कल्प. ,, ३६. ,, १३, १४
च. चि. ,, २९. ,, १–२

२. कृ. कल्प० ३. पृ. २८. तत्र श्लोक एष वसिष्ठादुद्धृतः ।

३. 'वेदमयं' इति कृ. कल्प० समीचीनः पाठः ।

४. कृ. कल्प. पृ. २८. संवर्तादिति

५. 'अर्यिने च' इति कृ. कल्प० समीचीनः पाठः । यथास्थिते पाठे 'अतिथये इति भाव्यम् ।

६. कृ. कल्प. पृ. ३१. देवलादिति ।

७ 'नाम' इति कृ. कल्प० पृ. ३१.

८. कृ. कल्प० पृ. ३६. यमादिति ।

९. 'सममब्राह्मणे' इति तत्र समीचीनः पाठः ।

[10]मातापितृषु[11] यद्दानं भ्रातृस्वसृसुतेषु च ।
जायात्मजेषु यद्दत्तं त्रिषु नाशो विधीयते ॥ ६ ॥
[12]धूर्ते वन्दिनि मल्ले च कुचिन्दे कूटवेशके ।
चाटूकरणचौरेभ्यो दत्तं भवति निष्फलम् ॥ ७ ॥
न दद्यादेव तद्दानं तथा शूद्रनिवेशने ।
गणयाजिषु नष्टेषु तथा ब्रह्मजितेषु च ॥ ८ ॥
[13]बैडालवृत्तिके चैव हीनाङ्गेष्वतिवेदके ।
दन्तहीने रवने(?)चापि दत्ते चापि प्रनश्यति ॥ ९ ॥
[14]यस्य धर्मो ध्वजो नित्यं अवाध्वजशिरोश्रितः(?)[15] ।
प्रच्छन्नानि च पापानि बैडालं नाम तद्व्रतम् ॥ १० ॥
[16]यः [17]कारणं पुरस्कृत्य व्रतचर्यां निषेवते ।

०. स्व. म. १२. ६ = कृ. कल्प० पृ. ४० प. २, ३
च. चि. ,, ३३ ,, १५. १६.
,, ,, ,, ७ = कृ. कल्प० पृ. ४८ ,, ५, ६.
च. चि. ,, ३९ ,, १६, १७.
,, ,, १०. = कृ. कल्प० ,, ४६ ,, ७.
= च. चि. ,, ३९ ,, २, ३.

१. कृ. कल्प० पृ. ४० तत्र व्यासादिति ।
२. ,, ,, ,, ४८ तत्र दक्षादिति । च. चि. पृ० ३९.
३. ,, ,, ,, ४५-४७. च. चि. पृ० ३८-३९
४. ,, ,, ,, ४६ मनो. विष्णोरिति । च. चि० पृ० ३९. वि. पु. व्या. विष्णुचित्तीया ३. १८. १०१.
५. सर्वत्र 'सुरध्वज इवोच्छ्रितः' इति पाठः ।
६. स्व. म. १२. ११, १२ = कृ. कल्प. पृ. ४६ प. १४, १५, पृ. ४७प. १.
च. चि. ,, ३८ ,, १६, १७, १८, १९.
,, ,, ,, १३ = कृ. कल्प. ,, ६७ ,, २, ३.
,, ,, ,, १४ = कृ. कल्प. ,, ४७ ,, ६. ७.
च. चि. ,, ३८ ,, २०, २१.
,, ,, ,, १५ = कृ. कल्प. ,, ४६ ,, ९. १०.
च. चि. ,, ३९ ,, ४. ५.
मनुस्मृतिः अ. ४ श्लो. १९६.

१७. श्लोकाः ११-१४-कृ. कल्प. पृ. ४६-७ च. चि. पृ. ३८ यमादिति ।

पापं व्रतेन प्रच्छाद्य बैडालं नाम तद्व्रतम् ॥ ११ ॥

अर्थं च विपुलं गृह्य दत्वा लिङ्गं विवर्जयेत् ।
आश्रमान्तरितं चक्रे[१८](?)बैडालं नाम तद्व्रतम् ॥ १२ ॥

परिगृह्याश्रमं यस्तु स्थिरस्तत्र न तिष्ठति ।
आश्रमस्य विलोपेन बैडालं नाम तद्व्रतम् ॥ १३ ॥

यतीनामाश्रमं गत्वा प्रच्यव्यास्मात्तु यः पुनः ।
यतिधर्मविलोपेन बैडालं नाम तद्व्रतम् ॥ १४ ॥

[१९]अधोदृष्टिर्नैष्कृतिकः स्वार्थाराधनतत्परः ।
शठो मिथ्याविनीतश्च शु(शू?)करव्रत[२०]उच्यते ॥ १५ ॥

दानमन्त्रानथो वक्ष्ये दातव्यद्रव्यभेदतः ।
मन्त्रैश्च मन्त्रितं कुर्वन्मन्त्रेणानेन पूजयेत् ॥ १६ ॥

सुरासुरसगन्धर्वा विद्याधरमुखाश्च ये ।
नित्यं दर्शनमिच्छन्ति तमादर्शं नमाम्यहम् ॥ १७ ॥

सुसंवादनया सर्वान् सुरान् घटयते यतः ।
या च घण्टेति विख्याता सा मे पापं व्यपोहतु ॥ १८ ॥

त्वं पूज्यः सर्वभूतानां चामरामरतृप्तिद ।
पराभूषणरूपाय चामराय नमो नमः ॥ १९ ॥

धान्य त्वं सर्वभूतानां परमाधाररूपक ।
जन्तूनां जीवभूतानां श्रीनिवासाय ते नमः ॥ २० ॥

या शक्तिः सर्वभूतानां वैष्णवी पारमेश्वरी ।
तिलधेनुस्वरूपेण सा मे पापं व्यपोहतु ॥ २१ ॥

१८. अत्र 'रक्षेद्' 'वक्ष्ये' इति पाठान्तेऽपि अर्थो न स्पष्टः ।
१९. मनु. ४. १९६ कू. कल्प. पृ. ४६. च. चि. ३९.
२०. किन्तु सर्वत्रापि बकवृत्तिलक्षणतया दृश्यते । शूकरस्त्वत्रासङ्गतः ।

अप्सु विष्णुर्वसेन्नित्यमापः सर्वस्य कारणम् ।
वैष्णवी परमा शक्तिर्जलधेनुर्नमोऽस्तु ते ॥ २२ ॥

स्वर्गमोक्षप्रदा नित्यं भुक्तिमुक्तिप्रदायिनी ।
नमामि गुडधेनुं त्वां सर्वदुर्गतिनाशिनीम् ॥ २३ ॥

जन्मकोटिकृतं पापं ब्रह्महत्यादि यत्कृतम् ।
विलयं याति यद्दानान्मधुधेनुं नमाम्यहम् ॥ २४ ॥

यद्दानफलमिच्छन्ति देवाः स्वर्गादपि ध्रुवम् ।
तस्यै दुस्स्वाति(खा?)हारिण्यै नमस्ते तिलधेनवे ॥ २५ ॥

पानीयाय नमस्तुभ्यं प्राणिनामपि तृप्तये ।
निरन्ने निर्जले धाम्नि मम स्वर्गाय वै भव ॥ २६ ॥

व्यजनाय नमस्तुभ्यं श्रमघ्नाय सदा नृणाम् ।
यमवर्त्मप्रयासाद्धि त्रायस्व त्वं सुरेश्वर ॥ २७ ॥

कुशकण्टकभूतापविनाशिभ्यां[२१] यमालये ।
सर्वदोषापहारिभ्यां[२१] पादुकाभ्यां नमो नमः ॥ २८ ॥

त्वं चक्षुः सर्वभूतानां जगदानन्दकारक ।
परब्रह्मस्वरूपाय प्रदीपाय नमो नमः ॥ २९ ॥

विनानुलेपनं देवा न यान्ति प्रीतिमुत्तमाम् ।
तस्माद्यमालये प्रीतिसुखं देहि ममालये(?)[२२] ॥ ३० ॥

वनस्पतिसमुद्भूत देवतानां विभूषणम् ।
परलोकहितार्थाय वरमाल्याय ते नमः ॥ ३१ ॥

देवासुरमनुष्याणां तथान्येषां च देहिनाम् ।
भूषणं परमं यस्मादतः स्वर्णाय ते नमः ॥ ३२ ॥

२१. अत्र लिङ्गव्यत्ययः ।
२२. अत्र अनुलेपनद्रव्यसम्बोधनरूपः मलयजादिः शब्दः अपेक्ष्यते ।

सर्वधर्मस्वरूपाय सर्वपापहराय च ।
पितृणां परमार्थाय रजताय नमो नमः ॥ ३३ ॥

ऐरावतकुले जातः नृपाणां वाहनोत्तमः ।
लक्ष्मीनिवासहेतुस्त्वं दिव्यमूर्ति (र्ते) नमोऽस्तुते[२३] ॥ ३४ ॥

तुरङ्गमङ्गलोत्पन्न वाहनानां त्वमुत्तमः ।
रेवन्ताधिष्ठिताश्च त्वं सूर्यवंश नमोऽस्तु ते ॥ ३५ ॥

शिविके त्वं मनुष्याणां यानं परममुत्तमम् ।
देवान् वहसि दुर्गेषु अतः पाहि सनातनि ॥ ३६ ॥

प्रजापतिसमुद्भूते वैष्णवि लोकपूजिते ।
ग्रीष्म (?) रूपेण सर्वेषां दासि[२४] पाहि मनोरमे ॥ ३७ ॥

वराहेणोद्धृतासि त्वं लोकान् वहसि सर्वदा ।
विष्णोराश्रम (य?) भूतासि वसुधे त्वां नमाम्यहम् ॥ ३८ ॥

आवासः सर्वभूतानां देवतानां च सर्वदा ।
श्रिया वासो यतस्त्वं हि गृहवर्य नमोऽस्तु ते ॥ ३९ ॥

[२५]या लक्ष्मीः सर्वभूतानां या च देवेष्ववस्थिता ।
धेनुरूपेण सा देवी मम पापं व्यपोहतु ॥ ४० ॥

एवं दानं ततो दत्वा स्वस्तीति ब्राह्मणो वदेत् ।
गायत्रीं च पठेत्तत्र *कोऽदादिति पठेत्ततः ॥ ४१ ॥

इति श्रीस्वल्पमत्स्यपुराणे षट्पादकार्यासाहस्रे (?)
दानविधौ द्वादशोऽध्यायः

२३. अयं श्लोको गजं परामृशति ।
२४. शुश्रूषार्थं दीयमानां दासीं विषयीकरोत्ययं श्लोकः ।
२५. आ. म. ८२ ११. च. चि. पृ. ४०३, पङ्क्ति ४-५.
* यजुर्वेदारण्यकम्; 'क इदं कस्मा अदा'दितिमन्त्रः ।

मत्स्य उवाच—

[1]रात्रौ दानं न शंसन्ति विना चोभयतोमुखीम्[2] ।
यज्ञान्ते च ददेद्रात्रौ गोयज्ञे तु विवर्जयेत् ॥ १ ॥

द्रव्यस्य नाम गृह्णीयाद्दानीति ततो वदेत् ।
तोयपात्रेण तद्दद्यादर्घपात्राच्च विद्युतिः ? ॥ २ ॥

[3]प्रतिग्रहीता सावित्रीमन्ते चापि प्रकीर्तयेत् ।
प्रतिग्रहं पठेदुच्चैः प्रतिगृह्य द्विजोत्तमात् ॥ ३ ॥

मन्त्रं पठेत्तु राजन्यादुपांशु च तथा विशः ।
मनसा तु तथा शूद्रात् स्वस्तिवाचनकं तथा ॥ ४ ॥

सोङ्कारं ब्राह्मणे कुर्यान्निरोङ्कारं महीपतौ ।
प्राजापत्यो गजः प्रोक्तः रेवन्तः तुरगः स्मृतः ॥ ५ ॥

[4]तथा चैकशफं सर्वं[5] कथितं यमदैवतम् ।
महिषश्च तथा न्याय्यः (याम्यः?) उष्ट्रो वै नैर्ऋतो भवेत् ॥ ६ ॥

रौद्री धेनुर्विनिर्दिष्टा छाग आग्नेय उच्यते ।
मेषं तु वारुणं विद्यात् वराहो वैष्णवः स्मृतः ॥ ७ ॥

आरण्याः पशवः सर्वे कथिता वायुदेवताः ।
जलाशयानि सर्वाणि विविधश्च कमण्डलुः ॥ ८ ॥

कुम्भं च करकं चैव वारुणानि द्विजोत्तम ।
सामुद्राणि च रत्नानि सामुद्र्याणि तथैव च ॥ ९ ॥

१. वि. ध. ३. ३०१. ३. २. वि. ध. 'अभयदक्षिणाम्' इति ।
३. च. चि. पृ. ९५. पङ्क्तिः १०, २०-३ ।
४. श्लो. ६–१२. च. चि. पृ. ९६.७ ; श्लो. ६–१० :
विधानपारिजाते (पृ. ३६) च वि. धर्मोत्तरादिति ।

आग्नेयं कनकं प्रोक्तं सर्वलोहानि यानि च ।
प्राजापत्यानि मांसानि षक्कान्नमपि च द्विजाः ॥ १० ॥

पुष्पाणि सर्वगन्धानि गान्धर्वाणि च भो द्विज ।
बार्हस्पत्यं स्मृतं वासः रजतं चन्द्रदैवतम् ॥ ११ ॥

पक्षिणश्च तथा सर्वे वायव्याः परिकीर्तिताः ।
विद्या ब्राह्मी विनिर्दिष्टा विद्योपकरणानि च ॥ १२ ॥

[५]मत्स्यमांसे विनिर्दिष्टे प्राजापत्ये तथैव च ।
छत्रं कृष्णाजिनं शय्यां रथमासनमेव च ॥ १३ ॥

उपानहौ तथा यानं यच्चान्यत् प्राणवर्जितम् ।
उत्तानाङ्गिरसो (सः) तद्वत् शय्या दारुमये शृणु ॥ १४ ॥

उत्तानाङ्गिरसो (सः) तत्र रम्भा(?) चान्यत्र भो द्विजाः ।
महाच्छत्रे भवेत्सूर्यः पेयानामथ वारुणः ॥ १५ ॥

चरकी* चामरस्यास्य नारिकेलजलस्य च ।
रसोपकरणं सर्वं कथितं शक्रदैवतम् ॥ १६ ॥

गृहस्य लक्ष्मीर्विज्ञेया खड्गस्यापि च कालिका ।
छुरिकाया भवेद् दुर्गा कट्टारस्य§ तु चण्डिका ॥ १७ ॥

आदर्शस्य भवेच्चन्द्रः घण्टायाश्चापि वासवः ।
कम्बलस्य भवेत्सूर्यः सर्वं वा विष्णुदैवतम् ॥ १८ ॥

[६]भूमेः प्रतिग्रहं कुर्यात् भूमेः कृत्वा परिग्रहम् ।
आरुह्य च गजस्योक्तः स्त्रीरूपकरिणां करे ॥ १९ ॥

केशरेषु तथैवाश्वं स्त्रीरूपे वामकर्णके ।
प्रतिग्रहीता चायच्छेन्महिष्या दक्षकर्णके ॥ २० ॥

५. श्लो. १३–१४ : च. चि. पृ. ६७. पङ्क्ति–२.
* देवताविशेषः । § विशसनार्थः शास्त्रविशेषः ।
६. श्लो. १९ : च. चि. पृ. ६८ पङ्क्ति ४, ८.

[७]महिषस्य तथा शृङ्गे चामरस्य च चामरे ।
कर्णे वापि च गोश्चान्ये पुच्छे कृष्णाजिनस्य तु ॥ २१ ॥

बीजानां मुष्टिमादाय यवान्यादाय सर्वशः ।
वस्त्रं दशायामादद्यात् परिधायाथवा पुनः ॥ २२ ॥

आरुह्योपानहौ दृभ्यामुपर्यास्यासनेषु च ।
ईषायां तु रथं ग्राह्यं छत्रं दण्डे च धारयेत् ॥ २३ ॥

व्यजनस्य तथा मुष्टौ खड्गस्य त्सरुदेशतः ।
द्रुमाणां पर्वतानां च मूले न्यस्य करं द्विजः ॥ २४ ॥

धर्मध्वजं तस्य स्पृष्ट्वा प्रविश्य च तथा गृहम् ।
प्रतिग्रहस्य यो धर्मं न जानाति द्विजो विधिम् ॥
द्रव्यस्तेयसमायुक्तो नरकं प्रतिपद्यते ॥ २५ ॥

इति स्वरूपमत्स्यपुराणे . . . . दानविधौ
द्रव्यदेवताकथने त्रयोदशोऽध्यायः ॥

७. श्लो. २१-४ : च. चि. पृ. ६८. पङ्क्ति. १४, १६-२०.

मत्स्य उवाच—

[1]कूपारामप्रपाकारी तथा वृक्षप्ररोपकः ।
कन्याप्रदः सेतुकारी स्वर्गमाप्नोत्यसंशयः (म्) ॥ १ ॥
तडागे यस्य पानीयं सततं खलु तिष्ठति ।
सूर्यलोके गतिस्तस्य नात्र कार्या विचारणा ॥ २ ॥
येषां तडागानि शुभाः प्रपाश्च
कूपा आरामाश्च प्रतिश्रयाश्च ।
अन्नप्रदानं मधुरा च वाणी
तेषामयं चैव परश्च लोकः ॥ ३ ॥
पानायत्तं तु सकलं त्रैलोक्यं सचराचरम् ।
[2]पानीयेन विना वृत्तिर्लोके नास्तीति(ह)कर्हिचित् ॥ ४ ॥
तस्माज्जलाशयः कार्यः पुरुषेण विपश्चिता ।
तोयं स्वर्गविधि चैव उत्तरेन्द्रे (?) ततः फलम् ॥ ५ ॥
तडागपुष्करिण्यौ च दीर्घिका वापिरेव च ।
नलिनी सेतुबन्धश्च प्रपाकूपस्तथैव च ॥ ६ ॥
[3]जलयन्त्रं शैलधरो [धारा] गर्भ कलस [श] मेव च ।
[4]प्रावृट्काले स्थितं तोयमग्निष्टोमफलं लभेत् ॥ ७ ॥
शरत्कालं (ल?) स्थितं या(यत्)स्यादगृर्ध्व(?) [तदुक्त?][5] फलदायकम् ।
[6]वाजपेयातिरात्राभ्यां हेमन्ते शिशिरे स्थितम् ॥ ८ ॥

१. श्लोक १-३. कृ. क. पृ. २७६. च. चि. पृ. ९९७' १००५. उभयत्र यमादिति ।
२. इदमर्धं च. चि. पृ. ९९०. वि. धर्मो इति ।
३. एतेषां विवरणमधः श्लो २० आरभ्य दत्तम् ।
४. आ. म. ५८. ५३-४. च. चि. पृ. १००६ : प्रावृट्कालेऽपि पानीयं तडागे यस्य तिष्ठति । अग्निष्टोमफलं तस्य पुरुषस्य प्रकीर्तितम् ॥ कृ. क. पृ. २८७.
५. आ. म. ५८. ५३. कृ. क. पृ. २८७.
६. कृ. क. पृ. २८७.

ग्रीष्मे वापि स्थितं तोयं राजसूयाद्विशिष्यते ।
एकाहं तु स्थितं तोयं पृथिव्यामपि सत्तमाः ॥ ९ ॥

कूलानि तारयेत्तस्य सप्तपूर्वापराणि च ।
दिनैकेनाश्वमेधेन तुल्यं भवति वै द्विजाः ॥ १० ॥

तडागादे (:) सनी (?)कर्ता विष्णुपुरं व्रजेत् ।
अकामान्मुक्तिकामाद्वा भवेदक्षयलोकभाक् ॥ ११ ॥

तोयदः प्रत्यहं विप्राः पार्थस्याङ्गं विभज्यतः (?) ।
देवतिर्यङ्मनुष्येषु स्पृशन् स्वर्गं समश्नुते ॥ १२ ॥

तस्मान्निःकल्मषीभूय ब्रह्मभूयाय कल्पते ।
अन्ते स्वर्गमवाप्नोति मोक्षं च लभते ध्रुवम् ॥ १३ ॥

नगरग्रामयोर्मध्ये गृहस्य पुरतोऽपि वा ।
विदिग्याम्यं नैर्ऋतं च वर्ज्यं कुर्याज्जलाशयम् ॥ १४ ॥

सहस्रहस्तविस्तारं दैर्घ्येणाष्टाधिकं भवेत् ।
तडागं तद्विजानीयादुत्तमं परिकीर्तितम् ॥ १५ ॥

मध्यमं च तदर्धेन तदर्धेन कनिष्ठकम् ।
कलौ पञ्चशतं कुर्यान्मध्यमं च चतुश्शतम् ॥ १६ ॥

त्रिशतेनापि प्रस्तारे दैर्घ्ये पञ्चशतानि वै ।
त्रिशतेन भवेद्दैर्घ्यं तथा च द्विशतेन च ॥ १७ ॥

प्रस्तारस्य च विन्यासे प्रथमं मानमुच्यते ।
मध्यं सार्धशतेनापि प्रस्तारं विंशहीनकम् ॥ १८ ॥

द्वादशैकादशं यावत् पञ्चविंशतिविंशकम् ।
बद्ध्वा संस्थापयेत्तोयं बद्धतोयं विदुर्बुधाः ॥ १९ ॥

यन्त्रेणानीयते धारा विदु (दू) रात् शिल (शैल) निर्मिता ।
काष्ठवंशमयेनापि सा धारा [illegible] ॥ २० ॥

गिरिधारा च भूमिस्था अन्तरीक्षगताथवा ।
सा धारा गिरिधारा स्यात् सर्वाभीष्टप्रदायिका ॥२१॥

त्रिहस्तमथ प्रस्तारं सार्धहस्तमथापि च ।
निम्ने षोडशहस्तं स्यादिष्टकाभिर्विनिर्मितः ॥२२॥

महाकूपस्तु स प्रोक्तः द्विहस्ताभ्यां प्रकूपकः ।
तरुमूले मण्डपे वा तोयदानं करोति यत् ॥
निखाते प्रत्यहं विप्राः सा प्रपा परिकीर्तिता ॥२३॥

वर्तुलं चैकहस्तेन तदर्धेनापि सत्तम ।
मासार्धं मासमात्रं वा वर्षाकाले स्थितं च वा ॥
गर्भमेतद्विजानीयाच्चतुरश्रंभवेत् क्रमः ॥२४॥

आयामे विंशहस्तं स्यात् षोडशं चापि वा चरेत् ।
त्रिचतुःपञ्च कलसाः(शाः) तोयपूर्णा हि नित्यशः ॥
यद्दानं चापि वैशाखे घटदानमिति स्मृतम् ॥२५॥

कथितं द्वादशगणं शृणु विप्र त्रयोदश ।
समस्तप्रतिमायां वा शय्याग्रामासने तथा ॥२६॥

द्विहस्तेन त्रिहस्तेन लोहयन्त्रं तु कारयेत् ।
वैशाखे वापि या धारा कुम्भे कृत्वा विधानवित् ॥२७॥

अङ्गुलं स्वर्णपादस्य पञ्चवेधांस्तु कारयेत् ।
विस्तारे चापि स्वर्णस्य मधुक्षीरस्य च क्रमात् ॥२८॥

सर्वमेकतमं कुर्यात् शर्करादिविनिर्मितम् ।
सुगन्धेन समालभ्य कुशतोयेन लोलितम् ॥२९॥

अग्निष्टोमाद्दशगुणं प्राप्नोति मनुजः खलु ।
यज्ञेष्वग्रे वा दद्यात् वेदिकायां शतं भवेत् ॥३०॥

अश्वमेधसहस्राणां सहस्रं यः समाचरेत् ।
तदाप्नुयात् तु यः कर्ता तदेव फलमश्नुते ॥३१॥

विमानैर्मोदते स्वर्गे नरकं स न गच्छति ।
गवादिः पिबते यस्मात्तस्य नश्येत पातकम् ॥३२॥

[1]यस्य खातवने गावस्तृप्यन्ति मासमेव सः[2] ।
तारयेत्सप्तकुलानि[3] सर्वदेवैः प्रपूजितः ॥३३॥

हायने हायने चैव कल्पात्कल्पं विधीयते ।
दाता स्वर्गमवाप्नोति तोयदस्सर्वतो भुवि ॥३४॥

मेघे[4] वर्षति खाते च जायते यति* शीकराः[5] ।
तावद्वर्षं वसेत्स्वर्गे कर्मणोऽस्मादिति स्मृतिः[6] ॥३५॥

पुराणायतदानस्य पुष्करिण्या जलस्य तु ।
न समं तु दिनैकस्य जनस्य धर्मतो भृशम् ॥३६॥

युगकोटिसहस्रस्य कारितादुपपातकात् ।
महद्भ्यः पञ्च पापेभ्यो जलदो मुच्यते ध्रुवम् ॥३७॥

अहिरिवदृढकञ्चुकाद्विमुक्तो ।
व्रजति हरेः सदनं तडागकारी ॥३८॥

[7]किं वा वाच्यः पुष्करिण्याः प्रभावः
कर्ता यस्माद्वारुणाद्ब्रह्मलोकात् ।
मूर्ध्नि प्रोता बाहुमात्रोच्छ्रिता सा
यावन्न स्यान्न निवर्तेत तावत् ॥३९॥

१. स्व० म० १४. ३३, ३४. ३५ = पद्म० सृष्टि०, ५१. ३, ४, ५
२. च पद्म. सृष्टि. ५४. २.
३. 'तावत्सप्तदिनात्पूतः' पद्म० सृष्टि० ५४-२.
४. मेघो पद्म० सृष्टि० ५४, ५.
* यावन्त इत्यर्थे प्रयुक्तोऽयं शब्दः ।
५. 'जायन्ते ये तु' पद्म० सृष्टि० ५४, ५.
६. 'तावद्वर्षसहस्राणि दिवमश्नाति मानवः' पद्म० सृष्टि० ५१. ३.
७. स्व०. म० १४. ३९ = [illegible] १. ६ ८९

काश्यां निवासो युगकोटिमेवं
दानं गवां लक्षसहस्रसंख्यम् ।
महामखस्यास्य तडागकर्मणः
प्रजाः कदाचिन्न समं व्रजन्ति ॥४०॥

कृत्वापि धर्मं यदशेषसंख्यं
कृत्वात्मपापं पततीह लोकः ।
महोत्कटैः पापशतैर्वरेण्यः
तडागकारी तु पुन र्न लिप्यते ॥४१॥

यदीच्छेत् संक्षयं नेतुं पापं जन्मशतोद्भवम् ।
एकाहमपि कौन्तेय भूमिस्थमुदकं कुरु ॥४२॥

कृत्वा जलाशयं सर्वं स्वयुग्मे चापि वत्सरे ।
प्रतिष्ठां विधिवत्कुर्यात् युग्माब्दे च भयं भवेत् ॥४३॥

वर्षे वर्षान्तरे वापि प्रतिष्ठां च समाचरेत् ।
सुवर्णचषकं कृत्वा तोयपूर्णं द्विजन्मने ॥४४॥

निगमज्ञाय धीराय प्रतिष्ठां च समाचरेत् ।
प्रासादपक्षे प्रासादं शातकुम्भमयं तथा ।
कृत्वा द्विजन्मने दद्याद्युग्मवर्षे प्रशस्यते ॥४५॥

शस्यते प्रथमेऽब्देऽपि युग्मे चापि प्रतिश्रवे ।
यन्त्रे चापि न दुष्येत कूपे षण्मासतः परम् ॥४६॥

पञ्चमासान्तरे कूपप्रतिष्ठां च समाचरेत् ।
दशधेनुफलं सम्यक् प्राप्यते नात्र संशयः ॥४७॥

तदन्तरे रत्नशृङ्गं दत्वा यज्ञं समाचरेत् ।
अन्यथा भयदं पुंसां न काम्यं जायते क्वचित् ॥४८॥

न चाष्टवर्षे चारामं नरः कृत्वेह दुर्मतिः ।
फलं वै शातकुम्भस्य दातापि न समाचरेत् ॥४९॥

तस्माज्जलाशयं कृत्वा उत्सृजेत् प्रथमाब्दिके ।
द्वितीये च तृतीये वा मासे चाब्दे न दुष्यति ॥५०॥

अनुत्सृष्टाः स्थापिता ये तडागारामसंश्रयाः ।
जलं पूयसमं विप्राः फलं विष्ठा फलाकृतिः ॥५१॥

पाने फलाशने वापि प्रासादे चापि विश्रमे ।
चाण्डालसेवनं यस्मान्मरणे बन्धमाप्नुयात् ॥५२॥

तस्मात्प्रतिष्ठा यद्येवं कर्तव्या सुसमाहितैः ।
मकरे संस्थिते हंसे सानुकूले शुभे तथा ॥५३॥

व्यतिपातादिरहिते प्रतिष्ठां च समाचरेत् ।
माघे विपुलकीर्तिः स्यात् फाल्गुने विजयी भवेत् ॥५४॥

चैत्रे मनोरथावाप्तिः वैशाखे धनवान् भवेत् ।
ज्यैष्ठे चारोग्यवान् सिद्ध आषाढे कुलवर्धनः ॥५५॥

देवतास्थापनं माघे फाल्गुने चापि शस्यते ।
चैत्रे ज्यैष्ठे व्याधिकरमाषाढे स्वर्गमाप्नुयात् ॥५६॥

वापीनलिन्योर्गर्तस्य* स्वर्गदं सुखदं भवेत् ।
कार्तिके जलयन्त्रस्य वद्धतोयस्य च द्विजाः ॥५७॥

[२]वारे भृगोर्देवगुरोर्बुधस्य सोमस्य सर्वे शुभदा भवन्ति ।
लग्ने शुभस्थे शुभवीक्षिते वा कुर्यात् प्रतिष्ठां च जलाशयानां

प्रतिपच्च द्वितीया च तृतीया माधवस्य च ।
त्रयोदशी पञ्चदशी पौर्णमासी तथैव च ॥
दशमी सप्तमी विप्राः प्रतिपत्तिथयः क्रमात् ॥५९॥

[३]सम्प्राप्य चैतानि शुभान्यहानि
कार्या प्रतिष्ठा विधुवद्बुधे च ।

* गर्भ इति पूर्वनिर्दिष्टमिदं स्यात् ।
२. स्व म १४ ५८ = भविष्य० मध्यम० २ . २६ . २.
३. „ „ „ ६० = „ „ „ „ „ „ „ .

षडशीतिके वाप्ययनद्वये च ।
युगादिके पुण्यदिने शुभे च ॥६०॥

[४]हस्ताश्विनी रेवती च पुष्यो मृगशिरास्तया ।
अनुराधा तथा स्वातिः प्रतिष्ठादिषु शस्यते ॥६१॥

इति स्वल्पमत्स्यपुराणे षट्पादकार्यासाहस्रे (?) प्रतिष्ठाविधौ
चतुर्दशोऽध्यायः

४. ,, ,, ,, ६१ = आ. म. २६४. ७.

मत्स्य उवाच—

[1]लक्षैकवृक्षसंयुक्तमुत्तमं कृत्ति [वृति ?] बन्धनम् ।
मध्यमं चायुतैः कार्यं सहस्रेण कनिष्ठकम् ॥ १ ॥

कलौ चायुतमारामं द्वे सहस्रे तु मध्यमम् ।
तदर्धेन कनिष्ठं स्यादशक्तोऽपि सहस्रकैः
तदर्धेन शतेनापि सर्वाशक्ते कलौ युगे ॥ २ ॥

विप्रार्जुनैः केशरैश्च बदरैः शाल्मलैरपि ।
पाटलाशोकभृङ्गैश्च हीनं (?)[2] कुर्यात् प्रयत्नतः ॥ ३ ॥

न मध्ये बहुपात् [3]कुर्यात् पनसामलकानि च ।
कलाहैस्तान्तरं कृत्वा सहकारं तु रोपयेत् ॥ ४ ॥

मुनिहैस्तान्तरं चान्ये पूगं चाष्टकरान्तरे ।
महायज्ञं च कुरुते यो रोपयति पादपम् ॥ ५ ॥

स्वच्छायाफलपुष्पाढ्या पादपाः पथि रोपिताः ।
सर्वपापहरं सर्वकामदं तुलसीवनम् ॥ ६ ॥

सहस्रारोपणाद्विप्राः सर्वान् कामानवाप्नुयात् ।
नानाजातिगणवृतं पुष्पारामं तु कारयेत् ॥ ७ ॥

स याति वैष्णवं लोकमयुतं च तदर्धकम् ।
तावद्वर्षसहस्राणि यावद्बीजदलानि च ॥ ८ ॥

१. श्लो० १-३ दृश्यतां भविष्य० मध्यमपर्व० ९-९०.
२. 'चाहीनम्' इति स्यात् ।
३. वटः —अमरः २. ४.३२.
४. १६ इत्यर्थः
५. ७ इत्यर्थः ।

वसन्ति देवता लोके तुलसीं रोपयन्ति ये ।
शतं चामलकं रोपेत् किंशुक [कं ?] द्वादशापि च ॥ ९ ॥

अश्वत्थामलकं विप्रा दश द्वादश वा तथा ।
बीजस्य शोधनं कुर्यात् गर्भाधानादिका क्रिया ॥ १० ॥

कार्यानुरूपं यद्यस्य तस्य तावद्विधिं शृणु ।
भूमिं गृहीत्वा वास्त्वीशं रसपानं[६] शिखिध्वजम् ॥ ११ ॥

पश्य लम्बेति (?) मन्त्रेण बीजान् प्रक्षाल्य यत्नतः ।
त्र्यम्बकमिति मन्त्रेण दुग्धेनाभ्युक्षयेत्ततः ॥ १२ ॥

चन्दनोत्सिक्ततोयैश्च श्रीश्चतेति[७] (?) च संस्मरन् ॥
नियतं कलशे कृत्वा त्रिरात्रं स्थापयेत्ततः ।
सितवस्त्रधरो भूत्वा प्रभाते चापि रोपयेत् ॥ १४ ॥

तुलसीरोपणविधिं बीजानामथ शोधनम् ।
वक्ष्ये यथानुरूपेण यथाकालमतन्द्रितः ॥ १५ ॥

तुलस्या बीजमादाय आषाढे श्रावणेऽपि वा ।
सौम्यग्रहानुरूपेण सौम्यवारे विशेषतः ॥ १६ ॥

रात्रौ बीजानि तोये तु स्थापयेत् कुशवारिणा ।
आप्यायस्वेति मन्त्रेण गन्धतोयैरनन्तरम् ॥ १७ ॥

स्पृष्ट्वा चामृतबीजं च दश द्वादश एव च ।
कलशे स्थापयेद्धात्रीं मयूराण्डेन लेपयेत् ॥ १८ ॥

जाते संरोपयेद्वृक्षं त्रिहस्तान्तरतस्ततः ।
मयूरपत्रैः संवेष्ट्य निशासूत्रैश्च वेष्टयेत् ॥ १९ ॥

न दक्षिणे न नैर्ऋत्ये न चाग्नौ कारयेत् क्वचित् ।
न ज्यैष्ठे रोपयेद्वृक्षान् न सिंहे च कदाचन ॥ २० ॥

६। कृ. कल्प० दान. पृ० ३०२ धनपालं भविष्य० मध्यम० १.१०.२३ . वनपालं, च. चि. पृ. १०४६.
७. 'ह्रीश्चते' इति स्यात् ।
८. हरिद्रा इत्यर्थः ।

तुलसीं च विशेषेण रोपयन् यात्यधोगतिम् ।
वृक्षालये वास्तुमध्ये न शमीं रोपयेत् क्वचित् ॥२१॥

न केशरं पञ्चशिरां (?) कलिचण्डोल (?) मेव च ।
वसन्ते दापयेत् कूपं शिशिरे तु तडागकम् ॥२२॥

वैशाखे रोपयेद्वृक्षानाश्विने केशरं तरुम् ।
फलतोयेन बीजानां क्षालनं प्रथमं स्मृतम् ॥२३॥

द्वितीये गन्धतोयाभ्यामश्वत्थस्य च बीजकम् ।
वर्तित्वा क्षालनं कृत्वा बीजानां गर्भधारणम् ॥२४॥

मत्स्यतोयेन धान्यानाम् आम्रबीजैरथापि वा ।
हरिद्रया किंशुकानां पनसस्य च सत्तमाः ॥२५॥

[९]कलायस्य च माषस्य क्षालनं गौरसर्षपैः ।
पनसं मधुना पश्चात् पूगानामविरालकैः (?) ॥२६॥

ताम्रतोयैर्नारिकेलं वनमार्जारविष्ठया ।
व्रीहीणां चाषकारिणामश्वत्थस्य विशेषतः ॥२७॥

काकविष्ठा शृगालस्य चम्पकस्य बकस्य च ।
पनसस्याश्वविष्ठा वा किंशुकानां तथैव च ॥२८॥

पञ्चयोजनपर्यन्ता भवेत् सेतुस्तथोत्तमा ।
मध्या यामत्रयाणां तु तदर्धेन कनीयसी ॥२९॥

यामैकेन कलौ शतं तदर्धं च तदर्धकम् ।
प्रतिश्रयं च तन्मध्ये कारयेत् सुसमाहितः ॥३०॥

दशवृक्षान्वितं कुर्यात् पनसाश्वत्थमन्दैः[१०]
कूपवाली (पी?) समायुक्तं जलयन्त्रादिभूषितम् ॥
नीचमण्डपसंयुक्तं सुस्तद्वयसमन्वितम् ॥३१॥

इति स्वल्पमत्स्यपुराणे षट्पादकार्यासाहस्रे (?) प्रतिष्ठाविधौ पञ्चदशोऽध्यायः ।

९. शमीधान्यविशेष० ।
१०. मन्दारैरिति यावत् ।

मत्स्य उवाच—

सर्वस्वेनापि विप्रेन्द्राः देवतायाः प्रतिश्रयम् ।
कुर्याद्वित्तानुसारेण यथावल्लक्षणान्वितम् ॥१॥
सर्वोत्तमं शैलमयमिष्टकादिविनिर्मितम् ।
शैलेष्टकामयं कुर्यादथवा मृत्तिकामयम् ॥२॥
अथ दारुमयं विप्राः तृणकाष्ठमयं च वा ।
तृणवंशमयं कुर्यादथ वंशमयेन वा ॥३॥
यावत्कुपातालशिला हि वेश्मनः
. . . . त्वमाप्नोति न वै तदेतत् (?) ।
[1]तावत् सुवेशोऽमरलोकवासी[2]
प्रासादकृज्जातु न जायतेह[3] ॥४॥
कलौ लोहमयं वर्ज्यं तथा वंशमयं च यत् ।
पञ्चपुष्करसंयुक्तं न कुर्यात्तु गृहाश्रमी ॥५॥
समतीतं भविष्यं च कारयित्वा हरेर्गृहम् ।
स्वर्गं च वैष्णवं लोकं मोक्षं च लभते क्रमात् ॥६॥
. . . . . भूमिं कोलयेच्च तदाकृतिः ।
वाहयेद्वापयेद्वान्नै नः तिलस्यारामवर्जनम् ॥७॥
यावद्वास्तुबलिं तत्र दद्यादर्घं विभूतये ।
अकृत्वा वास्तुयागं च यस्तडागं समुत्सृजेत् ॥
प्रासादमथवारामं तदर्धार्धफलं लभेत् ॥८॥

१. स्व. म. १६. ४b = भविष्य° मध्यम° १. ६. ८८b.
२. सुरेशस्सुरलोक° भविष्य° मध्यम° १. ६. ८८b.
३. जायते हि भविष्य° मध्यम° १. ६. ८८b.

षोडशोऽध्यायः

तस्मात्प्रतिष्ठादिवसादूर्ध्वं सप्तदिनानि वै ।
भूम्यादि पञ्च पत्रं वा प्रत्यर्घं च विधीयते ॥९॥

पश्चात् प्रतिष्ठा कर्तव्या तद्दिने वा समाचरेत् ।
प्रतिष्ठादिवसे कृत्वा रौरवं स्यादधोगतिः ॥१०॥

इति स्वल्पमत्स्यपुराणे षट्पादकार्यासाहस्रे (?)
प्रतिष्ठाविधौ षोडशोऽध्यायः ।

श्री मत्स्य उवाच—

[1]प्रासादस्योत्तरे पूर्वे पश्चिमे वा विशेषतः ।
मण्डपमर्चयेत्[2] तत्र हस्तषोडशविस्तृतम् ॥१॥

प्रस्तारे करहीनं स्याच्चतुर्हस्तान्तरे स्थितम् ।
दशहस्तममुच्छ्रेधं[3] त्रिहस्तं च द्विहस्तकम् ॥२॥

चरकाद्वयसंयुक्तं समण्डपं तु कारयेत् ।
विंशहस्तान्तरं कुर्यात् प्रासादस्य जलाशयात् ॥३॥

तदर्धं द्वादशाथापि तदर्धं वान्तरं भवेत् ।
किञ्चित् कुब्जं तडागे तु पूर्वतः परिवर्जयेत् ॥४॥

पुष्करिण्यां पश्चिमे तु उत्तरे च प्रशस्यते ।
अर्कहस्तान्वितं कुर्यात् प्रस्तारे करहीनकम् ॥५॥

सेतौ तु वर्तुलं कार्यमारामे कुब्जकं भवेत् ।
सेतुमध्ये प्रकर्तव्यमथवा भागहीनकम् ॥६॥

आराममध्ये तद्वत् स्यात् मण्डपश्च चतुर्मुखः ।
पञ्चाशत् कारयेत्.क्षेत्र(म्) अंशं हित्वा च वेदिकाम् ॥७॥

कुण्डं प्रकल्पयेत्तत्र सर्वलक्षणसंयुतम् ।
एककुण्डस्य पक्षे तु पञ्चकुण्डे भवेद्दिशि ॥८॥

अग्रतोऽपि भवेदेकं स च पक्षे शृणु द्विज ।
अष्टाम्वामाशु वेद्यायां गौरीपतिमहेन्द्रयोः ॥९॥

१. द्रष्टव्यं मत्स्य० २६४.१३.
२. अर्चयेत् इत्येतत् 'रचयेत्' इत्यस्मापपाठः स्यात् ।
३. 'समुत्सेधं' इति भवितव्यम् ।

मध्ये प्रकल्पयेत् कुण्डं यथावल्लक्षणान्वितम् ।
शोधयित्वा तुषैर्भूमिं तुषकेशादिवर्जिताम् ।।१०।।

विशुद्धं कारयेद्यत्नादन्यमन्यं भवेद्यतः ।
दशहस्तान्तरं कुर्यात् प्रासादोऽपि विशिष्यते ।।११।।

उद्योगे चाष्टहस्तान्ते नेमिं तु परिकल्पयेत् ।
पुष्करिण्यां चाष्टहस्तं सेतौ सेतौ विधीयते ।।१२।।

चतुर्हस्ता भवेद्वेदिर्हस्तोच्छ्रे धातु शोभना ।
चतुर्हस्त समायुक्ता प्रासादेऽपि विशेषतः ।।१३।।

तडागे त्वेकहस्तः स्यात् पाश्चात्ये परिकल्पयेत् ।
बाहुमात्रेण तत्कुर्यादुच्छ्रेधं तालमात्रकम् ।।१४।।

तत्तु कार्यं पुष्करिण्यां सेत्वारामादिकेषु च ।
त्रयोदशगणं हित्वा वेद्याश्चैव तु दक्षिणे ।।१५।।

उत्तरे च तथैशान्यां रत्निहस्तान्तरे भवेत् ।
कुण्डं प्रकल्पयेत्तत्र न च युग्माङ्गुलान्ततः ।।१६।।

मेखलाया मध्यमध्ये भवेत् सार्धाङ्गुलं ततः ।
प्रासादे च तडागे च पुष्करिण्यामिदं स्मृतम् ।।१७।।

प्राक् सार्धाङ्गुलकं हित्वा अन्यत्र तु विवर्जयेत् ।
षट्सप्ताङ्गुलविस्तीर्णं गजोष्ठं कारयेद्बुधः ।।१८।।

अश्वत्थदलवत्कुर्यान्मेखलोपरि विन्यसेत् ।
अष्टाङ्गुलैर्भवेन्नाभिः स्फुटमम्बुजयन्यसेत् ।।१९।।

अम्बुजेऽम्बुजचर्जं स्याद्योनौ योनिं विवर्जयेत् ।
दिक्षु ध्वजान्निबध्नीयाल्लोकपाल समन्वितान् ।।
पञ्चहस्तसमुच्छ्रेधान् चैत्याष्टकसमायुतान् ।।२०।।

कदलीपुष्पसदृशमष्टकर्षविनिर्मितम् ।
दण्डिकुशसमायुक्तं मेखलान्वितमेव च ।।२१।।

अम्बकमिति च प्राहुः पताकाश्च यथा शृणु ।
मुष्टिहस्तेन प्रस्तारं दैर्घ्यण (दैर्घ्येण) हस्तमात्रकम् ॥२२॥

किङ्किनीत्रयसंयुक्तं परिवाहसमन्वितम् ।
त्रिहस्तमुच्छ्रितं कुर्याल्लोहाद्यष्टकसंयुतम् ॥२३॥

घण्टाचामरसंवीतं वस्त्रमालयैरलङ्कृतम् ।
कार्या चाष्टौ पताकाश्च पार्श्वयोश्च द्वयं भवेत् ॥२४॥

ग्रहयज्ञे भवेन्मध्ये सेतुयागे तथैव च ।
प्रासादस्य तु रक्षेव हस्तिहस्ता ध्वजाः स्मृताः ॥२५॥

ग्रहयागे चतुर्हस्तं कूपे चापि त्रिहस्तकम् ।
प्लक्षौडु(दु)म्बरमश्वत्थम् वटं पूर्वादितः क्रमात् ॥ २६ ॥

द्वौ द्वौ कृत्वा समस्तानि कुम्भविमण्डितान्यपि ।
त्रिकाष्ठरहितान्येव पट्टवस्त्रावृतानि च ॥ २७ ॥

शाखातोरणमध्यान्ते भित्वा भित्वा विधीयते ।
त्रिहस्तेन समुच्छ्रेधं शाखापल्लवचर्चितम् ॥ २८ ॥

पञ्चसप्तच्छदयुतशाखामञ्जरिकान्वितम् ।
फलपुष्पसमायुक्तं नोचेद्वा धारयेत्ततः ॥ २९ ॥

सपुष्पान् पञ्चहस्तांश्चसप्तहस्तान् सुशोभनान् ।
रोपयेत् कदलीस्तम्भान् जटापल्लवसंयुतान् ॥ ३० ॥

निशाक्तसूत्रैः संवेष्ट्य कुशवद्धांश्च तानपि ।
रज्ज्वा संसूत्रितान् कुर्यात् कुत्रचित् व्यक्तमेव च ॥ ३१ ॥

दुकु(कू)लैश्चित्रवस्त्रैश्च वेष्टयेत् स्तम्भमालिकाः ।
वितानविदितान् भद्रानुपर्युपरिभूषितान् ॥ ३२ ॥

श्वेतपीतं प्रतिष्ठायां वैष्णवे यागकर्मणि ।
शैवे श्वेतं तथा रक्तं शाक्ते रक्तं प्रशस्यते ॥ ३३ ॥

ग्रहयागे भवेद्रक्तं कृष्णं वा योजयेत् क्वचित् ।
न कृष्णं योजयेत् पीतं न धूमं स्यात् कदाचन ॥ ३४ ॥

[३]शुभास्तत्राष्टहोतारो द्वारपालस्तथाष्ट वै ।
अष्टौ तु जापकाः कार्याः ब्राह्मणा वेदपारगाः ॥ ३५ ॥

[४]सर्वलक्षणसम्पन्ना मन्त्रज्ञाश्च जितेन्द्रियाः ।
कुलशीलसमायुक्ताः शुद्धदेहसमुद्भवाः ॥ ३६ ॥

[५]सर्वावयवसंपूर्णा मन्त्रवेदविशारदाः ।
सुराना (?) गमतत्त्वज्ञाः दम्भलोभविवर्जिताः ॥ ३७ ॥

शौचाचारपरा नित्यं सन्ध्योपासनतत्पराः ।
समाः शत्रौ च मित्रे च ब्रह्मोपेन्द्रहरप्रियाः ॥ ३८ ॥

ऊहापोहार्थतत्त्वज्ञा वास्तुविद्याविशारदाः ।
न्यासछन्दपदज्ञाश्च तेषामाचार्यता भवेत् ॥ ३९ ॥

काकस्वरोऽरूपविद्यश्च क्षुद्व्याधिभ्यां प्रपीडितः ।
अज्ञः साहसिको लुब्धः श्यावदन्तो ह्यनाकृतिः ॥ ४० ॥

मत्सरी च द्विजद्वेषी निन्दको वृषलीपतिः ।
पिशुनो देवलश्चैव वेदनिन्दक एव च ॥४१॥

पुण्यजीवी धर्मच्छेत्ता धर्मविक्रीत एव च ।
क्लीवः क्रूरश्चैकमुष्कोप्यर्शरोगी गलव्रणः ॥४२॥

कृष्णदन्तो मितलिनः (?) भार्याद्वेषी च लोलुपः ।
अपुत्रश्चाप्यसंतुष्टः यज्ञपात्रं न कारयेत् ॥४३॥

मातामहं मातुलं च श्यालं चैव क्रमात्ततः ।
न योजयेन्महायागे विनर्त्विजं द्विजर्षभाः ॥४४॥

प्रतिगर्भेषु कलसान् यज्ञोपकरणानि च ।
सौवर्णै रजतै र्वापि ताम्रैर्वा वित्तसम्भवे ॥४५॥

३. स्व. म. १७.३५ = आ. म. ५८.११
४. स्व. म. १७.३६ = आ. मा. ५८. १२.
५. स्व. म. १७. ३७, ३८, ३९a = आ. म. २६५.२.३०. d. ४.

अभावे मृन्मयैर्वापि स्थापयेदविचारयन् ।
पंचपल्लवसंयुक्तं रक्तमाल्यैरलंकृतम् ॥४६॥
पंचगर्भान्वितं कुर्यात् फलाक्षतविभूषितम् ।
कुम्भे च दाडिमफलं नि(लि)कुचामलकानि च
पूगं जीवन्तिकं चैव तालं च पनसं त्यजेत् ॥४७॥
विष्णुक्रान्ता वटाश्वत्थौ सहकार उडु(दु)म्बरः ।
पंच पल्लवमिष्टं वै दीक्षायां पनसं भवेत् ॥४८॥
विवाहे तु पल्लवैकं गृह्यागे त्रिपल्लवम् ।
महायागे तु पंचैवमभिषेके च शस्यते ॥४९॥
[६]ततो यागगृहादन्यन्मण्डपान्तरमाश्रितः ।
यजमानस्तथा नित्यं कर्म कुर्याद् यथाविधि ॥५०॥
[७]पंच देवान्नमस्कृत्य तथा यज्ञेश्वरं हरिम् ।
संकल्पं च तथा कृत्वा ब्राह्मणानामनुज्ञया ॥५१॥
एतस्मिन् भूप्रदेशे चामुकगोत्रेति संस्मरन् ।
वेदव्यासादिकथितशास्त्रे यथा निदर्शितम् ॥५२॥
यथा यथा पुराणोक्तपुष्करिण्यादिनामक ।
जलाशयप्रतिष्ठायाः फलानां प्राप्तिहेतवे ॥५३॥
यथा यथा पुराणोक्तं यथा कुण्डविधानतः ।
जलाशयप्रतिष्ठां च करिष्येऽहं यथाविधि ॥५४॥
एवं संकल्प्य च ततो वृद्धिश्राद्धं समाचरेत् ।
मातृयागं पुरस्कृत्य वृद्धिश्राद्धं समापयेत् ॥५५॥
यागमण्डपस्यैशान्ये (?) नवहस्ते च मण्डपे ।
स्वगृहे च नदीतीरे देवतायतनेऽपि च ॥५६॥

६. स्व. म. १७. ५० = भविष्य° मध्यम° २०-१.
७. स्व. म. ५१-५५ = भविष्म° मध्यम° २—५ ab, ६, ७.

यागं संकल्पयेत्तत्र ब्राह्मणान् वरयेत्ततः ।
तडागादिप्रतिष्ठायां यागमण्डपपश्चिमे ॥५७॥

श्राद्धं समाप्य वरयेत् षडर्घेण च मन्त्रवित् ।
कुशद्विजेऽपि[८] सर्वत्र अव्याधिष्णुरमात्रकम् (?)
उत्तराभिमुखो भूत्वा जानुस्पृष्टमहीतलः ।
गृहीत्वौडु(दु)म्बरं पात्रं वारिपूर्णं तिलान्वितम् ॥५९॥

चतुर्दर्भं च गन्धं च सपुष्पं च फलान्वितम् ।
मातुलङ्गं नागरं च धातकी सहकारकम् ॥६०॥

फलान्येतानि शस्तानि जम्बीरमथ दाडिमम् ।
नारिकेलं च पूगं च तालं खर्जुरमेव च ॥६१॥

जीवन्तीं चैव वासन्तीं संकल्पे परिवर्जयेत् ।
[१०]जलाशयादि यागे च कर्तव्यः पूर्वसंमुखः ॥६२॥

साधारणं चोत्तरास्यो गृह्यज्ञेषु सम्मुखः ।
[११]प्रणवं पूर्वमुच्चार्य जयज्ञेश्वरं स्मरेत् ॥६३॥

गङ्गां चादित्यचन्द्रौ च द्यौर्भूमिरहोरात्रिके ।
सूर्यः सोमो यमः कालो महाभूतानि पञ्च वै ॥६४॥

एते शुभाशुभस्यैव कर्मणो नवसाक्षिणः ।
इत्युच्चार्य न्यसेद्धर्मं (?) दत्वा पुष्पाञ्जलिं न्यसेत् ॥६५॥

[१२]ताम्राश्मकाञ्चनं शस्तं वर्ज्यं हस्तं च मृन्मयम् ।
शुक्तिशङ्खे खड्गलोहे संकल्पं नैव कारयेत् ॥६६॥

८. 'कुशद्विजं तु सर्वत्र अर्घ्यं विष्टरमात्रकम्' इति भविष्य° २.१८.३७ cd.
९. स्व. म. १७.५९. cd = भविष्य° २.१८.३७ ab.
१०. स्व. म. १७-६२ cd, ६३. ab = भविष्य° २.१८-३८.
११. स्व. म. १७.६३ cd-६५ = भविष्य° २.१८.४३, ४४, ४५. ab.
१२. दृश्यता भविष्य° २.१८-४२.

[१३]महाव्रते प्रतिष्ठादौ शस्तं पात्रं हिरण्मयम् ।
ताम्ररौप्यमयं वापि अथवा . . तिसम्भवम् ॥६७॥

देवप्रतिष्ठापक्षे तु रजतं परिवर्जयेत् ।
शैवे चैव सुप्रशस्तं गणेशे सूर्यके त्यजेत् ॥६८॥

[१४]रजताश्मं च खड्गं च गोयागे राजतं स्मृतम् ।
यज्ञीयपात्रपुटकं हस्तस्थाने प्रकीर्तितम् ॥६९॥

ऐशान्यां निक्षिपेत्तोयं प्रतिष्ठायां च पूर्वतः ।
आकाशे निक्षिपेत् काले पितृयज्ञे तु दक्षिणे ॥७०॥

त्वक्शङ्खमश्महस्तं च कांस्यं सीसकमेव च ।
सङ्कल्पोऽत्र न कर्तव्यो मृन्मये च कदाचन ॥७१॥

सर्वत्रौडु(दु)म्बरं शस्तं मेध्यं पत्रपुटं च वा ।
[१५]कामात्मको नैव भवे(त्)[१६]निष्कामोऽपि न शोभनः ॥७२॥

तस्मात् काममहं[१७](?) धर्मं विना मोक्षं न चाचरेत् ।
संकल्पेन विना यस्तु धर्मं चरति मानवः ॥
न तस्य फलमाप्नोति नित्यनैमित्तिकेन च ॥७३॥

चरणान्ते यजेद्विप्रान् लम्बमानैश्च मन्त्रकैः (?) ।
गन्धमाल्याम्बरयुतैः कुण्डलाद्यैरनेकशः ॥७४॥

स्वयं पूर्णमुखो भूत्वा आचार्यस्तु उदङ्मुखः ।
अर्चयेद्विष्टराद्यैश्च अर्घाद्यैः सपरिच्छदैः ॥७५॥

१३. स्व. म. १७.६७ = भविष्य० २.१८. ३९ ab.
१४. स्व. म. १७.६९, ७० = भविष्य० २.१८.३९ cd, ४०, ४१ ab.
१५. स्व. म. ७२ cd, ७३ = भविष्य० २.१८.३४, ३६.
१६. 'भवेन्नि०' इति पाठः भविष्य० २.१८.३५.
१७. 'मयं' इति पाठः भविष्य० २.१८.३५.

अन्येषां वृणुयात् पश्चात् प्रणिपत्य प्रसादयेत् ।
[18]ब्रह्ममूर्तिस्त्वमाचार्य संसारार्णवतारक ॥
त्वत्प्रसादादृगुरो यज्ञः प्राप्नोति यो मयेप्सितः ॥७६॥

चिरं मे शाश्वती कीर्तिर्यावल्लोकाः चराचराः ।
प्रसीद त्वं महादेव प्रतिष्ठा कर्मसिद्धये ॥७७॥

वेदवेदाङ्गतत्वज्ञ ज्ञानदृष्टिप्रदायक ।
प्रसीद सीदतां नाथ त्वमाचार्य नमोऽस्तु ते ॥७८॥

मखेषु विततेष्वेव विततेषु मुहुर्मुहुः ।
नियोजयति कर्माणि ब्राह्मणं प्रणमाम्यहम् ॥७९॥

ज्वलद्भैश्वानरप्रख्य धूमधामनिभानन ।
[19]षडङ्गवेदतत्वज्ञ ऋत्विङ्मुख्य नमाम्यहम् ॥८०॥

[20]प्रफुल्लकमलोद्भास भास्वत् भासुरभूषित ।
प्रकीर्णशास्त्रसंभार विधिज्ञ प्रणतोऽस्मि ते ॥८१॥

पुनः सर्वौषधिजलैरात्मानमभिषिच्य च ।
स्थण्डिले विलिखेच्चक्रं षड्भद्रं षोडशारकम् ॥८२॥

ब्राह्मणान् स्थापयेत् पश्चात् स्वैः स्वैर्मन्त्रैर्यथाविधि ।
[21]यज्ञे विततेयोऽसौ पूज्यते पुरुषस्सदा ॥
नारायणस्वरूपोऽसि यज्ञं मे सफलं कुरु ॥८३॥

यज्ञेषु साक्षी सर्वेषु वेदवेदार्थतत्ववित् ।
ऋग्वेदज्ञ महाप्राज्ञ इन्द्ररूप नमोऽस्तु ते ॥८४॥

मखश्रेष्ठेषु सर्वेषु येन मन्त्राः सुविस्तृताः (?) ।
यजुर्वेदार्थतत्वज्ञ ब्रह्मरूप नमोऽस्तु ते ॥८५॥

१८. स्व. म. १७. ७६, ७७ = भविष्य° २. १८. १७, १८.
१९. स्व. म. १७. ८००d = भविष्य° २. १८. २३ab.
२०. स्व. म. १७. ८१ = भविष्य° २. १८. २२.
२१. स्व. म. १७. ८३–८५ = भविष्य° २. १८. २७०d–३०ab.

[२२]माङ्गल्यकर्मनिरतमद्वैतज्ञानरूपिणम् ।
सिद्धये मम यज्ञस्य नमामि शिवरूपिणम् ॥८६॥

पालयन्ति दिशः सर्वाः विदिशश्च तथापि याः ।
दिक्पालरूपिणं विप्रं यज्ञसिद्धौ नमाम्यहम् ॥८७॥

स्योनापृथिवीति मन्त्रेण मण्डलं प्रविशेत्ततः ।
मण्डलं प्रोक्ष्य संपूज्य पञ्चगव्येन पल्लवैः ॥८९॥

मण्डल त्वमसि विष्णोर्द्वारकारूपमास्थितम् ।
तेन त्वावाहयाम्यस्य स्वर्गप्राप्तिं कुरुस्व(ष्व)मे ॥८९॥

ततस्त्रिगुणितैः सूत्रैर्मण्डपं परिवेष्टयेत् ।
ईशमारभ्य विप्रेन्द्र आरामे पश्चिमादितः ॥९०॥

सेतौ चोत्तरमारभ्य देवपक्षे पुरः क्रमात् ।
स्वकीयासनमासाद्य प्राणायामं समाचरेत् ॥९१॥

सवित्रेऽर्घं ततो दत्वा गुरुषड्क्तीश्च पूजयेत् ।
गणेश्वरं तथैशान्यां कलसे(शे) तु समर्चयेत् ॥९२॥

ब्रह्माणं वासुदेवं च नैवेद्यैश्च पृथग्विधैः ।
स्वैः स्वैर्मन्त्रैश्चवेदोक्तैरथवाप्यागमोदितैः ॥९३॥

ध्यानवर्णानुरूपेण ऋषिच्छन्द आदिं स्मरन् ।
श्वेतपुष्पं गृहीत्वा तु तर्जन्यङ्गुष्ठयोगतः ॥९४॥

प्रणवेन समाकृष्य जीवं मूलेन वर्त्मतः ।
आकाशे स्थापयेज्जीवं भूतशुद्धिमथाचरेत् ॥९५॥

ध्यायेच्च वरुणं शुक्लं शुद्धस्फटिकसन्निभम् ।
किरीटकुण्डलधरं पाशहस्तं महाबलम् ॥९६॥

उपर्युपरि हस्ताभ्यां सिताब्जयुगधारिणम् ।
सेवितं मुनिगन्धर्वैराजीवायतलोचनैः ॥९७॥

२२. स्व. म. १७. ८६, ८७ = भविष्य० २. १८. ३१–३२०d.

ग्रहाद्यैरावृतं ध्यायेद् बालासनशतं(?)शिवम् ।
एवं ध्यात्वा स्वमन्त्रेण सोऽहमेवं शिरे(?)न्यसेत् ॥९८॥

अमृतार्णं दीर्घशुभं(?)पञ्चाङ्गन्यासमारभेत ।
सम्बोध्य तावदर्घं च गायत्र्याभ्युक्षयेत्ततः ॥९९॥

तावत्* संवारुणं बीजं वरुणाय च धीमहि ।
सलोकाय(?)विद्महे त्वन्नो वरुण प्रचोदयात् ॥१००॥

[२३]ऐशान्यां गणनाथं च आग्नेय्यां गुरुपादकम् ।
पूर्वादि द्वारदेशेषु धर्मादीन् मध्यतो यजेत् ॥१०१॥

आधारशक्तिमारभ्य साङ्गोपाङ्गं तमेव च ।
पात्रान्तरगतं पुष्पं पाणिकच्छपिकान्वितम् ।
ध्यात्वा चारोपयेन्मन्त्री अष्टौ मुद्राः प्रदर्शयेत् ॥१०२॥

[२४]एह्येहि भगवन् वरुण यज्ञ एष प्रवर्तते ।
यज्ञभागं गृहाणेमं त्वामत्रावाहयाम्यहम् ॥१०३॥

इत्यावाह्य गायत्र्या च स्नापयेदुक्तमार्गतः ।
पाद्यार्घाचमनीयं च मधुपर्कं च दापयेत् ॥१०४॥

अङ्गपूजां ततः कृत्वा दद्यात् पुष्पाञ्जलित्रयम् ।
[२५]पत्रमूलेषु पूर्वादौ धर्मादीन् प्रतिपूजयेत् ॥१०५॥

[२६]सर्वं सोमं च कामं च रजः सत्वं तमस्तथा ।
भूस्तत्वं च भुवस्तत्वं स्वस्तत्वं चाप्यनुक्रमात् ॥१०६॥

तत्रैव शक्तीः संपूज्य सत्यादीनि च सर्वशः ।
आद्या नीला तथा श्रीश्च गङ्गा पुष्टिः सरस्वती ॥१०७॥

* 'वं' इति भवितव्यम् ।

२३. द्रष्टव्यं भविष्य° २. २०. ३७cd, ३८ab.

२४. स्व. म. १७. १०३ = भविष्य° २. २०. ४२.

२५. द्रष्टव्यं भविष्य° २. २०. ४४cd.

२६. स्व. म. १७. १०६cd = भविष्य° २. २०. ४५cd.

तुष्टिर्मनोभवा चेति पूजयेद्गन्धचन्दनैः ।
दक्षिणकर्णिकायां च पूजयेद्गृहनायकम् ॥१०८॥
[२७]पूर्वादिपत्रमध्येषु सोमादींश्च पृथक् पृथक् ।
लोकपालांस्तु पूर्वादि पत्राग्रेषु समर्चयेत् ॥१०९॥
[२८]कर्णिकाया वामभागे इमं मन्त्रं यजेत्ततः ।
ऐशान्ये चैव ब्रह्माणमनन्तं मध्यपङ्कजे ॥११०॥
[२९]शिवं विष्णुं गणेशं च पूजयेद्गन्धचन्दनैः ।
ईशादिपीठकोणेषु कमलामम्बिकां तथा ॥१११॥
राक्षसे विश्वकर्माणं वायव्ये तु सरस्वतीम् ।
द्वारदेशेषु पूर्वादौ मरुतश्चावहादिकान् ॥११२॥
वह्निकोणादौ विप्रेन्द्र पिशाचादीन् समर्चयेत् ।
[३०]पिशाचान् राक्षसान् भूतान् वेतालांश्च समर्चयेत् ॥

इति स्वल्पमत्स्यपुराणे षट्पादकार्यासाहस्रे (?) सप्तदशोऽध्यायः

२७. दृश्यतां भविष्य° २. २०. ४६.
२८. दृश्यतां भविष्य° २.२०.४७, ४८ ab.
२९. स्व. म. १७.१११, ११२ = भविष्य° २.२०.४९ ab, ५० cd, ५१.
३०. स्व. म. १७.११३ cd = भविष्य° २.२०.५४ ab.

मत्स्य उवाच—

पूजाक्रममयो वक्ष्ये तडागादिषु सत्तमाः ।
पूर्णवित्ते पूर्णमानं मध्यवित्ते तु मध्यमम् ॥ १॥
स्वल्पवित्ते कनिष्ठं च यथावद्विधिनोदितम् ।
रक्तपुष्पं रक्तगन्धं रक्ताक्षतसमन्वितम् ॥ २॥
ध्यायेत्पुष्पाञ्जलियुतं हृत्समं कुसुमाञ्जलिम् ।
चिन्तयेद्रक्तमादित्यं जवा (पा) कुसुमसन्निभम् ॥
द्विभुजं पद्महस्तं च पद्मासनगतं विभुम् ॥ ३॥
रक्ताम्बरधरं देवं रक्तपङ्कजमालिनम् ।
सप्ताश्वरथमारूढं देवगन्धर्वसेवितम् ॥ ४॥

[1]आकृष्णेनेति मन्त्रस्य सुवर्णवर्ण ऋषिर्[2]नुष्टुप् छन्दः सविता देवता आदित्यप्रीतये विनियोगः ।

रक्तपद्मासनस्थो यः सप्तघोटकवाहनः ।
सप्तद्वीपप्रदीपो यः तस्मै नित्यं नमोनमः ॥५॥
ध्यायेत्सोमं शुक्लवर्णं शुक्लपद्मासनस्थितम् ।
शुक्लमाल्याम्बरधरं दशघोटकवाहनम् ॥
द्विभुजं च गदाहस्तं सर्वकामप्रदायकम् ॥ ६॥

[3]इमन्देवा इति मन्त्रस्य सुपर्ण ऋषिर्बृहतीछन्दः सोमो देवता सोमस्तुतौ विनियोगः ।

शङ्खकुन्दप्रतीकाशः क्षीरसागरसम्भवः ।
शम्भोः शिरसि संस्थो यः तस्मै नित्यं नमो नमः ॥७॥

१. ऋ. वे. १, ३५, २. २. 'त्रिष्टुप्' इति ऋ. वे. १, ३५, २.
३. वा. सं ९,४०.४. ऋवे, ८. ४४, १६.

रक्तमङ्गारकं ध्यायेद्रक्तपद्मासनस्थितम् ।
चतुर्भुजं च वरदं शूलशक्तिगदाधरम् ॥८॥

अग्निर्मूर्द्धेति मन्त्रस्य विरूपऋषिर्गायत्री छन्द आग्नेयी देवता भौमप्रीतये विनियोगः ।

जवा(पा)विद्रुमसंकाशो विद्युद्दामसमप्रभः ।
शक्तिहस्तो महीपुत्रः तस्मै नित्यं नमो नमः ॥९॥

पीतवर्णं बुधं ध्यायेत् पीताम्बरधरं शुभम् ।
पीतपद्मासनगतं पीतमाल्यानुलेपनम् ॥
खड्गचर्मगदापाणिं वरदं सिंहवाहनम् ॥१०॥

[५]उद्बुध्यस्वेति मन्त्रस्य परमेष्ठिऋषिस्त्रिष्टुप्छन्दः आग्नेयी देवता बुधप्रीतये विनियोगः ।

पीतपद्मासनस्थो यः पीताम्बरधरो विभुः ।
दिव्यरूपः शशिपुत्रः तस्मै नित्यं नमो नमः ॥ ११ ॥

पीताभं च गुरुं ध्यायेत् पीतमाल्यानुलेपनम् ।
पीतपद्मासनस्थं च पीताम्बरविभूषितम् ॥ १२ ॥

चतुर्भुजं च वरदं साक्षसूत्रकमण्डलुम् ।
दण्डसूत्रं सोत्तरीयं यज्ञसूत्रसमन्वितम् ॥ १३ ॥

[६]बृहस्पत इति मन्त्रस्य गृत्समदऋषिस्त्रिष्टुप् छन्दः बृहस्पतिप्रीतये विनियोगः ।

पद्माकृतिः पद्महस्तः पीताम्बरधरो गुरुः ।
इन्द्रादिभिस्स्तूयमानः तस्मै नित्यं नमो नमः ॥ १४ ॥

श्वेतवर्णं भृगुसुतं द्विजं कुन्देन्दुसप्रभम् ।
चतुर्भुजं दण्डहस्तं वरदं पीतवाससम् ॥
बिभ्रत्कमण्डलुं काव्यमक्षसूत्रसमन्वितम् ॥ १५ ॥

५. वा. सं. १५. ५४.
६. ऋ. वे. २, २३, १५ ; तै. सं. १, ८, २२, २.

[७]अन्नादिति मन्त्रस्य अश्विनी सरस्वतीन्द्रा ऋषयः जगतीच्छन्दः आग्नेयी देवता शुक्रप्रीतये विनियोगः ।

कुन्दावदातो दैत्यानामाचार्यो भृगुनन्दनः ।
साक्षसूत्रधरः श्रीमान् तस्मै नित्यं नमो नमः ॥ १६ ॥

इन्द्रनीलद्युतिः सौरिर्वरदो गृध्रवाहनः ।
कृष्णमाल्याम्बरधरः कृष्णगन्धानुलेपनः ॥ १७ ॥

[८]शन्नो देवीति मन्त्रस्याथर्वनृषिर्गायत्रीछन्दः आपो देवता शनिप्रीतये विनियोगः ।

सूर्यपुत्रः शनिर्दीप्तो नीलाञ्जनचयप्रभः ।
छायापुत्रो महाकायः तस्मै नित्यं नमो नमः ॥ १८ ॥

करालवदनः शूली शंखचक्रधरः प्रभुः ।
नीलसिंहासनस्थश्च कुण्डलाद्यैरलंकृतः ॥ १९ ॥

[९]कयानश्चित्र इति मन्त्रस्य वामदेवर्षिः गायत्रीच्छन्दः इन्द्राणीदेवता राहुप्रीतये विनियोगः ।

शूलहस्तो महाभोगी दीप्तानल सुशोभनः ।
मुक्तादामधरः श्रीमान् तस्मै नित्यं नमो नमः ॥ २० ॥

कराली धूम्रवर्णश्च सदाविकृतदिङ्मुखः ।
किरीटी कुण्डलधरः सर्वकामप्रदायकः ॥ २१ ॥

[१०]केतुं कृण्वन्निति मन्त्रस्य मधुच्छन्दऋषिरग्निदेवता केतुप्रीतये विनियोगः ।

मेघगम्भीरनिश्वासः किरीटी लोकपूजितः ।
अर्धासनगतो देवः तस्मै नित्यं नमो नमः ॥ २२ ॥

७. वा. सं. १९, ७५.
८. ऋ. वे १०, ९, ४.
९. ऋ. वे. ४, ३१, १.
1. ल. शुक्रयों (शुक्रो यो?). अचिराद्दुपलब्धात् लण्डन् इत्यिया आगतेषु— मातृकातः 'ल' इति संकेतेन पाठान्तराणि दत्तानि ।
१०. ऋ. वे. १, ६, ३.

सहस्रनयनं देवं मत्तैरावतवाहनम् ।
किरीटकुण्डलधरं नानारत्नोपशोभितम् ॥ २३ ॥

लसत्कङ्कणकं दण्डधारिणं तृप्तिकारिणम् ।
राजते नीलपत्त्रेण भ्राजमानं महाद्युतिम् ॥ २४ ॥

दधतीं श्वफल[११] द्वन्द्वमिन्द्राणीं वामतः स्थिताम् ।
महारजतसम्बद्धचामरालंकृतैरपि ।
वीज्यमानं सुरूपाभिर्महिषीभिरहर्निशम् ॥ २५ ॥

सिंहस्कन्धं महाबाहुं सिद्धगन्धर्वसेवितम् ।
सिंहासनगतं वापि चिन्तयेत् सुरनायकम् ॥ २६ ॥

[१२]त्रातारमिति मन्त्रस्य कर्दम ऋषिर्गायत्रीच्छन्दः इन्द्रप्रीतये विनियोगः ।

[१३]इन्द्रस्तु सहसा दीप्तः सर्वक्षेत्राधिपो महान् ।
वज्रहस्तो महाबाहुस्तस्मै नित्यं नमो नमः ॥ २७ ॥

ततो वह्निं चिन्तयेदग्निभागे
[१४]करप्रभादीपयन्ती (?) शिखाभिः ।
चतुर्भुजैः स्वस्तिकं शक्तिमि(मृ ?) ष्टिम्[१५]
तथाभीतिं घृतमाल्यैर्दधानम् ॥ २८ ॥

[१६]अग्निर्मूर्द्धेति मन्त्रस्य काश्यपर्षिर्जगतीच्छन्दो वरुणो देवता अग्निप्रीतये विनियोगः ।

[१७]अग्निर्यो महसा दीप्तः सर्वतेजोमयोऽव्ययः ।
धूमकेतुरनाधृष्यः तस्मै नित्यं नमो नमः ॥ २९ ॥

११. स्व. म. स्वपन, ल. श्वपल. 'श्वफल' इति स्यात् । श्वफलं = बीजपूरफलम् ।
१२. ऋ. वे. ६, ४७, ११.
१३. आ. म. २६६. १९ c-d ; २० a-b. रघुनन्दनस्य जलाशयोत्सर्गतत्त्वे (जीवानन्दसंस्करणे) p. ५२१.
१४. ल. कनप्रभे. 'कनत्प्रभा' इति स्यात् ।
१५. ऋष्टिः खड्गः ।
१६. तै. सं. ४, ४, ४, १.
१७. आ. म. २६६. २० c-d ; २१ a-b ; जलाशयोत्सर्गतत्त्वे p. ५२१.

यमं ध्यायेद्दण्डहस्तं महामहिषसंस्थितम् ।
नीलाञ्जनचयप्रख्यं रक्तनेत्रं महाभुजम् ॥ ३० ॥

[१८]असि यम इति मन्त्रस्य औतथ्यर्षिरनिरुक्ता गायत्रीच्छन्दः आग्नेयी देवता यमप्रीतये विनियोगः ।

[१९]यमश्चोत्पलवर्णाभः किरीटी दण्डधृक् सदा ।
सर्वसाक्षी विशुद्धात्मा तस्मै नित्यं नमो नमः ॥३१॥
राक्षसेन्द्रं खड्गहस्तं लोकपालं च नैर्ऋतम् ।
नरारूढं महाकायं रक्षोभिर्बहुभिर्वृतम् ॥३२॥
खड्गहस्तं महानीलं कज्जलाचलसन्निभम् ।
नरयुक्तविमानस्थं पीताभरणभूषितम् ॥३३॥

[२०]एष त इति मन्त्रस्य औतथ्यर्षिरनिरुक्ता गायत्रीच्छन्दः आग्नेयी देवता निर्ऋतिप्रीतये विनियोगः ।

[२१]निर्ऋतिस्तु पुमान् कृष्णः सर्वलोकाधिपो महान् ।
खड्गहस्तो महाबाहुस्तस्मै नित्यं नमो नमः ॥३४॥
वरुणं च प्रवक्ष्यामि पाशहस्तं महाबलम् ।
शङ्खस्फटिकवर्णाभं सितपद्माम्बरावृतम् ॥
समासनगतं शान्तं किरीटवरधारिणम् ॥३५॥

[२२]वरुणस्योत्तमिति मन्त्रस्य नारायणर्षिरुष्णिक् छन्दः आपो देवता वरुणस्तुतौ विनियोगः ।

[२३]वरुणः सवनो(सबलो ?)[२४] जिष्णुः पुरुषो निम्नगाधिपः ।
पाशहस्तो महाबाहुस्तस्मै नित्यं नमो नमः ॥३६॥

१८. ऋ. वे. १, १६३, ३.
१९. आ. म. २६६. २१c-d ; २२a-b; ज. आ. उ. पृ. ५२१.
२०. तै. सं. १, ८, १, ४.
२१. आ. म. २६६. २२c-d ; २३a-b; ज. आ. उ पृ. ५२२.
२२. वा. सं ४, ३६.
२३. आ. म. २६६. २३c-d ; २४a-b ; ज. आ. उ. पृ ५२२.
२४. ल. सरलः ; आ. म. धवल. ; पाठान्तरं—सबलः ; ज. आ. उ. पाठः—धवलः ।

ततो वायुं प्रवक्ष्यामि द्विभुजं मृगवाहनम् ।
छत्राम्बरधरं शान्तं युवानं कुञ्जरप्रभम् ॥
पद्मासनगतं चैव पताकाध्वजसंयुतम् ॥३७॥

[२५]ततो वारे(?)ति मन्त्रस्य नारायणर्षि विष्णुर्देवता वायुप्रीतये विनियोगः ।

मातरिश्वा तु वायव्यां सर्वगो भगवान् प्रभुः ।
अन्तश्चारी च भूतानां तस्मै नित्यं नमो नमः ॥३८॥

कुबेरं वरदं देवं नरारूढं महाबलम् ।
हारकेयूररचितं पीताम्बरधरं शुभम् ॥
गदापाणिं च वरदं मुकुटाटोपसंयुतम् ॥३९॥

कुविन्दं कुरज (?) इति मन्त्रस्य विवस्वतर्षि स्त्रिष्टुप् छन्दः जनार्दनो देवता कुबेरप्रीतये विनियोगः ।

[२६]गौरो यस्तु पुमान् सौम्यः सदैव सुरसंवृतः ।
यक्षस्याधिपति र्भव्यः तस्मै नित्यं नमो नमः ॥४०॥

ईशानं वरदं देवं वृषवाहनत्र्यम्बकम् ।
चतुर्भुजं च कुन्दाभं शूलहस्तं महाबलम् ॥
सेव्यमानं च सुरौघैरुमया[२७] परिसेवितम् ॥४१॥

[२८]तमीशानमिति मन्त्रस्य ईशानर्षिर्बृहती छन्द ईशान देवता ईशानप्रीतये विनियोगः ।

[२९]ईशानः पुरुषः शुद्धः सर्वविद्याधिपो महान् ।
शूलहस्तो विरूपाक्षः तस्मै नित्यं नमो नमः ॥४२॥

२५. 'ततो विराडजायत' इत्ययं मन्त्रः स्यात्, वा. सं. ३१, ५.
२६. आ. म. २६६. २५c-d ; २६a-b ; ज. आ. उ. पु. ५२२.
२७. ल. सुरौघैश्च उमया.
२८. ऋ. वे. १, ८९, ५.
२९. आ. म. २६६. २६c-d ; २७a-b ; ज. आ. उ. पु. ५२२.

कमण्डलुधरं देवं श्रुवहस्तं महाबलम् ।
रक्तवर्णं चतुर्बाहुं हंसस्थं च विचिन्तयेत् ॥४३॥

[30]ब्रह्म जज्ञानमिति मन्त्रस्य कौण्डिन्यर्षिर्गायत्रीच्छन्दो ब्रह्मा देवता ब्रह्मणीतये विनियोगः ।

[31]पद्मयोनिश्चतुर्मूर्ति र्वेदवक्त्रः पितामहः ।
वेदाध्यक्षश्च लोकेशः तस्मै नित्यं नमो नमः ॥४४॥

अनन्तं भोगिराजानं सहस्रफणिनं शुभम् ।
शङ्खचक्रगदापद्मधारिणं श्वेतमुज्ज्वलम् ॥४५॥

[32]नमोऽस्त्विति मन्त्रस्य नारदर्षिर्गायत्रीच्छन्दः सर्पो देवता अनन्तप्रीतये विनियोगः ।

अनन्तस्त्वं महाबाहुर्दीप्तमूर्तिर्धराधरः ।
श्वेतपद्मासनस्थाय नमोऽनन्ताय वै नमः ॥४६॥

रक्तवर्णं च ब्रह्माणं साक्षसूत्रधरं तथा ।
वामे कमण्डलुधरं रक्तपद्मासनस्थितम् ॥४७॥

[33]आब्रह्मन्निति मन्त्रस्य गर्गर्षिरनुष्टुप् छन्दः शची देवता ब्रह्मप्रीतये विनियोगः ।

शिवः पीनश्चतुर्बाहुः तप्तकाञ्चनसन्निभः ।
जटामुकुटधारी च द्विरष्टवर्षाकृतिः (?)
व्याघ्रचर्मपरीधानः कटिसूत्रत्रयान्वितः ॥४८॥

[34]त्र्यम्बकमिति मन्त्रस्य वामदेवर्षिः पंक्तिच्छन्दः हरिर्देवता शिवप्रीतये विनियोगः ।

कम्बुग्रीवं गुडाकेशं शक्तिवर्णं शुभेक्षणम् ।
दक्षिणे तु गदापद्मे वामे चक्रधरं तथा ॥४९॥

३०. तै. सं. ४, २, ८, ४.
३१. आ. म. २६६. २७-d; २८a-b; ज. आ. उ. पृ. ५२२
३२. वा. सं. १३, ६. ३३. तै. सं. ७, ५, १८, १.
३४. ऋ. वे. ७, ५९. १२.

[३५]तद्विष्णोरिति मन्त्रस्य कपिलर्षिः पंक्तिच्छन्दो वामदेवो देवता विष्णुस्तुतौ विनियोगः ।

नीलं वासो नीलकायं त्रिनेत्रम्
लम्बतुण्डं दन्तमुग्रं गजास्यम् ।
दिव्यरूपं मोदकं वै दधानं
गौरीपुत्रं टङ्कहस्तं नमामि ॥५०॥

[३६]गणानां त्वेति मन्त्रस्य गणकर्षिः पंक्तिच्छन्दो वामदेवो देवता गणेशस्तुतौ विनियोगः ।

उत्तप्तधाम[३७] कनकाब्जवर्णां (?)
लसद्भुन[३८]द्धाम (?) चारुहस्ताम् ।
पद्मासनस्थामपि पद्महस्ता-
मिन्दीवराक्षीं कमलां नमामि ॥ ५१ ॥

[३९]हिरण्यवर्णामिति मन्त्रस्य ब्रह्मर्षिर्गायत्रीच्छन्दः कमलाप्रीतये विनियोगः ।

बिभ्राणां दशभिर्भुजैरसिवरं चक्रं त्रिसूलं शरं
शक्तिं खेटकमङ्कुशं च धनुषं पर्शुं च पाशं तथा ।
पंचास्योपरि पद्मविष्टरगतामुत्तप्तहेमप्रभा-
मापीनस्तनमण्डलां गिरिसुतां देवीं त्रिनेत्रां भजे ॥ ५२ ॥

[४०]अम्बे अम्बिके इति मन्त्रस्य हिरण्यगर्भर्षिर्गायत्रीच्छन्दो महेशो देवता महेश्वरी[४१] प्रीतये विनियोगः ।

टङ्कहस्तं महाकायमुत्पलाभयधारिणम् ।
अशेषशिल्पनिरतं नमामि सुरशिल्पिनम् ॥ ५३ ॥

३५. ऋ. वे. १. २२. २०.

३६. ऋ. वे. २, २३, १ । ३७. ल. मं. । ३८. ल. ल. । ३९. श्रीसूक्ते आद्या ऋक् । ४०. वा. सं. २३, १८; का. सं. २५, २० । ४१. ल. महिषमर्दिनी महेश्वरी° ।

[४२]विश्वकर्मेति मन्त्रस्य काश्यपर्षिः पंक्तिश्छन्दः मातलिर्देवता विश्वकर्मप्रीतये नियोगः ।

पूर्णचन्द्रप्रतीकाशां पूर्णचन्द्रनिभाननाम् ।
वाग्देवतां नमस्यामि पुस्तकाभयधारिणीम् ॥ ५४ ॥

[४३]यां मेधामिति मन्त्रस्य गौतमर्षिर्गायत्रीच्छन्द ईश्वरो देवता वाग्देवताप्रीतये विनियोगः ।

आवहं रक्तगौराङ्गं पीतवासः (सं) सुशोभनम् ।
सिंहासनगतं शान्तं वराभयकरं स्मृतम् ॥ ५५ ॥

[४४]अग्निश्च पृथिवीं चेति मन्त्रस्य अग्निमीलर्षिर्गायत्रीच्छन्दः अग्निदेवता प्रावह प्रीतये विनियोगः ।

प्रवहं पीतसङ्काशं नागयज्ञोपवीतिनम् ।
नानालङ्कारसंयुक्तं वृषभस्थं विभावयेत् ॥ ५६ ॥

[४५]ब्रह्म राजन्यमिति मन्त्रस्य ब्रह्मर्षिरनिरुक्ता गायत्रीच्छन्दः ब्रह्मादेवता प्रवहप्रीतये विनियोगः ।

उद्वहं नीलसङ्काशं नीलेन्दीवरधारिणम् ।
नीलपद्मासनस्थं च नीलाभरणभूषितम् ॥ ५७ ॥

योऽहमिति मन्त्रस्य धनऋषिरनुष्टुप्छन्दो नारायणदेवता उद्वहप्रीतये विनियोगः ।

सम्वहं चिन्तयेद्गौरं नानालङ्कारशोभितम् ।
अजस्थं चिन्तयेत् प्राज्ञः कुण्डलाद्यैश्च भूषितम् ॥ ५८ ॥

[४६]वैश्वानर इति मन्त्रस्य नलिनऋषिर्गायत्रीच्छन्दः श्रीर्देवता सम्वहप्रीतये विनियोगः ।

विवहं पिङ्गवर्णं च द्विभुजं मेषवाहनम् ।
शिखिपोतस्थितं ध्यायेत् [४७]सर्वलक्षणसंयुतम् ॥ ५९ ॥

४२. ऋ. वे. १०, ८१, ३ । ४३. वा. सं. ३२, १४ । ४४. वा. सं. २६, १ 'अग्निश्च पृथिवी च' इति वर्तते । ४५. का. सं. २८, ३ । ४६. १,९८,३ ४७. ल. धर्म° ।

[४८]अग्निमीळे इति मन्त्रस्य भार्गव ऋषिः पंक्तिच्छन्दः पावमानी देवता विवहप्रीतये विनियोगः ।

परिवहं पिङ्गलवर्णं मार्जारस्थं विचिन्तयेत् ।
नानाभरणसम्पन्नं रत्नहारोपशोभितम् ॥ ६० ॥

[४९]देवो देवीति मन्त्रस्य देवता ऋषयः पंक्तिच्छन्दः परिवहप्रीतये विनियोगः ।

[५०]परावहं रक्तवर्णं योगासनगतं विभुम् ।
खड्गधर्मचरं चैव पीतवासो (?) पशोभितम् ॥ ६१ ॥

[५१]यद्देवेति मन्त्रस्य नलिनऋषिर्जगतीच्छन्दः सोमो देवता परावहप्रीतये विनियोगः ।

[५२]अग्न्यादिषु च कोणेषु बहिः पीठान्ततोयजेत् ।
पिशाचान् राक्षसान् भूतान् वेतालांश्च यथाक्रमम् ॥ ६२ ॥
क्षोभकः कुशरूपश्च सौभद्रो जम्भकस्तथा ।
द्विरण्डो डिण्डिमश्चैव षट्पिशाचाः प्रकीर्तिताः ॥ ६३ ॥
गोमुखो नन्दो भद्रश्च[५३] द्विजिह्वो नलिनस्तथा ।
हस्तिकर्णो विशालाक्षः सप्तरक्षोगणः स्मृतः ॥ ६४ ॥
भूमिदो वरदश्चैव जयन्तः क्षोभकस्तथा ।
विश्वदन्तश्च कुमुद एते भूतगणाः स्मृताः[५४] ॥ ६५ ॥

४८. ऋ. वे. १, १, १, (ऋष्यादयः भिन्नाः वर्तन्ते । न केवलं अत्र, अन्यत्रापि प्रायः एवमेव भिन्नता दृश्यते]

४९. वा. सं. २१, ५६ 'देवो देवैः' इति वर्तते । स एव मन्त्रः अत्र निर्दिष्टः स्यात् ।

५०. दृश्यतां भविष्य-मध्यमपर्वणि आवहादीनां संक्षेपोक्तिः

आवहं प्रवहं चैव तथैवोद्वहसंवहौ ।
विन्यसेत्पश्चिमे द्वारि निवहं च परीवहम् ॥
विन्यसेदुत्तरद्वारि मरुतं च पराभवम् ॥

५१. वा. सं. २०, १४ । ५२. भविष्य-मध्यमपर्वणि २.२०.५३b-५७.

५३. भविष्ये-'नन्दभद्रश्च' । ५४. स्व. म. गणः स्मृतः ।

[५५]मुगदो नीलकर्णश्च वसन्तो यावकस्तथा ।
घोररूपा[५६] महाकाया[५७] वेताला: षट् प्रकीर्तिता: ॥६६॥

निगमोक्तैश्च मन्त्रैश्च पूजयेद्भूतिमिच्छतो[५८](?) ।
रक्तगन्धैश्च माल्यैश्च सन्मयै(?)र्मणिभिस्तथा ॥६७॥

स्थापयेज्जापकान् द्वारि बहुमन्त्रविशारदान् ।
प्रतिद्वारं खड्गधरं नीचासनं[५९] यजेत् ॥६८॥

अग्रतः स्थापयेत् कुम्भं क्षीरिवृक्षसमुद्भवम् ।
वटस्य वरुणस्यैव यन्त्रे खड्गं निधापयेत् ॥६९॥

कालरात्रिं ततो जप्त्वा चण्डीसूक्तं जपेदनु ।
[६०]बह्वृचः पूर्वतः स्थाप्य[६१] दक्षिणे तु यजुर्विदः[६२] ॥७०॥

५५. भविष्ये—'अङ्गदः'.
५६. स्व. म. —पो.
५७. स्व. म. —यो.
५८. ल. भूमिमिच्छत।.
५९. ल. °सनगतं.
६०. द्रष्टव्यतां आ. ल. ९३. १३१-४.
रात्रिसूक्तं च रौद्रं च पावमानं सुमङ्गलम् ।
पूर्वतो बह्वृचः शान्ति पठन्नास्ते ह्युदङ्मुखः ॥
शाक्तं शाक्रं च सौम्यं च कूष्माण्डं शान्तिमेव च ।
पाठयेद्दक्षिणद्वारि यजुर्वेदिनमुत्तमम् ॥
सुपर्णमथ वैराजमाग्नेयं रुद्रसंहिताम् ।
ज्येष्ठसाम तथा शान्ति छन्दोगः पश्चिमे जपेत् ॥
शान्तिसूक्तं च सौरं च तथा शाकुनकं शुभम् ।
पौष्टिकं च महाराज्यमुत्तरेणाप्यथर्ववित् ॥
तथा भविष्ये मध्यमपर्वणि २.२०.१७१ आरभ्य,
रात्रिसूक्तं च रौद्रं च पवमानं समुज्ज्वलम् ।
जतेच पौरुषं सूक्तं सर्वतोवरतं पृथक् ॥
शाक्तं रौद्रं च सौम्यं च कूष्माण्डं जातवेदसम् ।
सौरसूक्तं च यजतो दक्षिणेन यजुर्विदः ॥ इत्यादि
६१. ल. —प्याः.. ६२. ल. —दौ.

सामगः पश्चिमेनाथ उत्तरेऽथर्वणः स्मृतः[६४] ।
अथवा त्वेकमध्याय-शाखाध्यायिनमेव वा ॥७१॥

विष्णोर्हरस्य सूक्ताद्यान् पंचाङ्गं [६५]रुद्रमेव वा ।
सषाङ्गं रुद्रं संजाप्य प्रतिद्वारेषु जापकाः ॥७२॥

न्यासजपादिकं[६६] कृत्वा शिवपूजापुरःसरम् ।
पंचाङ्गरुद्रं सषाङ्गं सूक्तानन्यांश्च यत्नतः ॥
[६७]होमे प्रवर्तमाने तु सूक्तं वै वरुणात्मकम् ॥७३॥

वैराजं चैव सौपर्णं [६८]वामदेव्यं तथैव च ।
गोसूक्तं च विकर्णं च रक्षोघ्नानि च संजपेत् ॥७४॥

रात्रिसूक्तं च रौद्रं च कौष्माण्डं जातवेदसम् ।
मंगलं पावमानीं च गौर(?)सूक्तं तथैव च ॥७५॥

शौक्रं सौम्यमघोराख्यं मार्तण्डं शान्तिकं तथा ।
शान्तिसूक्तानि सर्वाणि संजपेद्देवताधिया ॥७६॥

स्वाहा प्रणम्य चक्रं सं(?)पाठो वैराजमुच्यते ।
दिक्पालसूक्तं[६९] सौवर्णं आप्यायस्वेति ऋक्त्रयम् ॥७७॥

तद्वामदेव्यमित्युक्तमनोहा (?) इति पंचकम् ।
गोसूक्तं[७०] तद्विजानीयाद्विभ्रतेति विकर्णकम् ॥७८॥

६३. ल. —गौ. ६४. ल. —र्णौ स्मृतौ.

६५. 'अथातः पंचांगरुद्राणा न्यासपूर्वकं जपहोमार्चनाभिषेकविधि व्याख्यास्यामः इति महान्यासे पंचाङ्गरुद्रविधिरुक्तः ।

६६. ल. जाप्यादिकं । ६७. दृश्यतां भविष्ये मध्यमपर्वणि २०.१७०.

६८. ल. 'आप्यायस्वेति ऋक्त्रयम् । तद्वामदेवमित्युक्तं मनोश्च इति य... वामदेवे तथैव च' इत्यधिकम् ।

६९. 'त्रातारमिन्द्रमवितारमिन्द्रं' इत्यादिमन्त्रभागः स्यात् । दृश्यतां याजुषमन्त्ररत्नाकरः ।

७०. 'आगावो अग्मन्नतभद्रमक्रन्' इत्येतत् गोसूक्तमिति वैदिकसंप्रदायः । तद्व्यतिरेकेन किं गोसूक्तमत्राभिप्रेतमिति न ज्ञायते । पूर्व ७४-श्लोक गोसूक्तप्रस्तावे ल. कोरो 'मनोश्च' इति 'अनोहा' इत्यस्य स्थाने दृश्यते ।

[७१]विश्वानि देवेत्यादि षट् रक्षोघ्नं परिकीर्तितम् ।
यज्जायते(?)त्यादिमन्त्रानृक्त्रयं रात्रिसूक्तकम् ॥७९॥

[७२]त्र्यम्बकमिति मन्त्रैकं रात्रौ तत्परिपठ्यते ।
[७३]यद्देवेत्यादिकौष्माण्डमृक्त्रयं समुदाहृतम् ॥८०॥

[७४]अग्ने बृहन्निति नवसूक्तं वै जातवेदसम् ।
ईशाने द्वादशर्क् वक्ष्ये मङ्गलं हितमुच्यते ॥८१॥

ऋक् सप्तदशकं चैव पावमानीति कथ्यते ।
[७५]आपो हि ष्ठा च गायत्री [७६]शन्नोदेवीस्तथैव च ॥८२॥

पावमानी परा ख्याता सर्वपातकहारिणी ।
[७७]ध्रुवोऽसीति च पंचांगं ते शिरसीति कथ्यते ॥८३॥

[७८]अन्नात् परिश्रु(स्रु)त इति प्रकर्षं शौक्रमुच्यते ।
[७९]आप्यायस्वेति निगमं तत्सौम्यमिति कथ्यते ॥८४॥

[८०]मयि गृह्णामीत्यादिकं[८१] मघोराख्यं विदुर्बुधाः ।
[८२]ऋचं वाचमृगध्यायं[८३] मार्तण्ड इति कथ्यते ॥८५॥

७१. ऋ. वे. ५, ८२, ५.
७२. ऋ. ७, ५९, १२.
७३. वा. सं. २०. १४-१६.
७३. ऋ. वे. १०, १, १.
७४. ऋ. वे. १०, ९, १.
७५. ऋ. वे. १०, ९, ४.
७६. वा. सं. ५, १३.
७७. वा. सं. १९, ७५.
७८. ऋ. वे. १, ९१, १६.
७९. तै. सं. ५, ७, ९, १.
८०. ल —त्यादि पठन् अघोरा.
८१. वा. सं. ३६, १.
८२. ल.—चो ऋ.

सर्वं प्रणवभिन्नेन सर्षिच्छन्दःपुरःसरम् ।
[८३]समस्तं देवयागे तु तदागेऽपि समस्तकम् ॥८६॥

पुष्करिण्यामपि तथा कनिष्ठेनार्द्धमेव च (?) ।
सेत्वारामयोस्तदर्धं कूपवाप्योस्तदर्धकम् ॥८७॥

एकवृक्षे(?)ऋक्त्रयं च मण्डपे संस्मरेदिति ।
गृहयागे वृषोत्सर्गे अर्द्धार्द्धं च विशेषतः ॥८८॥

अयुतहोमे लक्षे च कोटिहोमे समस्तकम् ।
शान्तिके पौष्टिके काम्ये तदर्धं च विधीयते ॥८९॥

[८४]यज्ञाग्रतः पवमानं पुरुषसूक्तं तथैव च ।
गायत्रीं चैव [८५]तद्विष्णोः तथा [८६]त्र्यम्बकमेव च ॥९०॥

रुद्रेण सह सप्ताङ्गं पंचाङ्गं शृणुसत्तम[८७] ।
यज्ञाग्रतो [८८]विष्णुसूक्तं अद्भ्यः सम्भूत एव च ॥ ९१ ॥
[८९]आशुशिशानमारभ्य [९०]वयं सोममेव च ।
रुद्रेण सह पंचाङ्गं यागपूजापुरः सरम् ॥ ९२ ॥

प्रजपेत्संहितां पश्चात् दिवा रात्रौ विशेषतः ।
पुराणं धर्मशास्त्रं च सहस्रकरणं विना (?) ॥ ९३ ॥

शृङ्गाराङ्गं केलिवादं हारं प्रकरणं त्यजेत् ।
प्रायश्चित्तमशौचाङ्गं सदैव यागकर्मणि ॥ ९४ ॥

अथ ध्यानं प्रवक्ष्यामि कृत्वा पापैः प्रमुच्यते ।
न्यासेन देहसन्दाहस्तस्मान्न्यासं समाचरेत् ॥ ९५ ॥

८३. द्रष्टव्यं भविष्ये मध्यमपर्वणि २०,१८०.
८४. वा. सं. ३४.१३. ८५. ऋ.वे. १,२२,२०. ८६. ऋ.वे.७,५९,१२
८७. ल. —मा: । ८८. 'विष्णोर्नुकं वीर्याणि' इत्यारब्धं सूक्तं स्यात् ऋ. वे. १,१५४; वा.सं. ५,२८; का.सं. ५,२४; द्रष्टव्यं याजुषमन्त्ररत्नाकरे: ।
८९. ऋ. वे. १०,१०३,१; वा. सं. २७,३३; का. सं. १८,१०
९०. वा. सं. ३.५६; का सं. ३,६४.

[९१]ओं यज्जाग्रत इत्यङ्गुष्ठाभ्यां नमः ।
ओं त्रिपादूर्द्धमिति तर्जनीभ्यां स्वाहा ।
ओं वेदाहमिति मध्यमाभ्यां वषट् ।
ओं अमीषां चित्तमित्यनामिकाभ्यां हूम् ।
ओं वयं सोममिति कनिष्ठाभ्यां वौषट् ।
ओं ऋचं ब्रह्मान्निति दिग् बन्धनम् ।

पंचाङ्गरुद्रस्य पुष्पदन्त ऋषिः पंक्तिच्छन्दः त्र्यम्बकमिति बीजं यद्देवानामिति शक्तिः सहस्रशीर्षेति नायकम् । ओं पुरुष नारायणो देवता पुरुषस्तुतौ विनियोगः ।

सप्ताङ्गरुद्रस्य पुष्पदन्त ऋषिस्त्रिष्टुप्छन्दः सविता देवता रुद्रमहे विनियोगः ।

वारुणमन्त्रस्य जगतीच्छन्दः शम्भुर्देवता वरुणस्तुतौ विनियोगः ।

वैराजसूक्तस्य नरोत्तम ऋषिः त्रिष्टुप् छन्दः सविता देवता मखस्तुतौ विनियोगः ।

सौपर्णसूक्तस्य ब्रह्मर्षि स्त्रिष्टुप् छन्दः वाराही देवता सुपर्णस्तुतौ विनियोगः ।
वामदेव सूक्तस्य ब्रह्मर्षिस्त्रिष्टुप् छन्दः शम्भुर्देवता वामदेवप्रीतये विनियोगः ।

गोसूक्तस्य हारीत ऋषिः पंक्तिच्छन्दः भवो देवता रुद्रप्रीतये गोयागे इन्द्रमहे विनियोगः ।

विकर्णसूक्तस्य वैश्वानर ऋषि गायत्रीच्छन्दः विकर्णप्रीतये विनियोगः ।

रक्षोघ्नसूक्तस्य हारीत ऋषिस्त्रिष्टुप् छन्दः हरिदवता प्रजापतिस्तुतौ विनियोगः ।

रात्रिसूक्तस्य बलभद्र ऋषिर्जगतीच्छन्दः कालरात्रिर्देवता इन्द्रमहे विनियोगः ।

रौद्रसूक्तस्य अघोरऋषिर्जयतीच्छन्दो वासवी देवता वासवप्रीतये विनियोगः ।

९१. भविष्य-मध्यमपर्वणि २.२०.१६६ आरभ्य.

कौष्माण्डसूक्तस्य नारायण ऋषिस्त्रिष्टुप्छन्दः शची देवता इन्द्रस्तुतौ विनियोगः ।

मङ्गल्यसूक्तस्य बलभद्रऋषिर्जगतीच्छन्दः धनदा[९२] देवता वाजपेये विनियोगः ।

जातवेदसूक्तस्य भव[९३]ऋषिर्गायत्रीच्छन्दो भवानी देवता जातवेदप्रीतये विनियोगः ।

पावमानीसूक्तस्य माधव ऋषिस्त्रिष्टुप्छन्दो वायवी देवता सर्वकामे विनियोगः ।

सौरसूक्तस्य वामनऋषिस्त्रिष्टुप् छन्दः शङ्करोदेवता शङ्करप्रीतये विनियोगः ।

शौकसूक्तस्य गणेश ऋषिः पंक्तिच्छन्दः सोमोदेवता सोमप्रीतये विनियोगः ।

मार्तण्डसूक्तस्य विषयसूक्त(?)ऋषिर्जगतीच्छन्दो रविर्देवता मार्तण्डप्रीतये विनियोगः ।

स्वगृह्योक्तेन मार्गेण कुण्डसंस्कारपूर्वकम् ।
स्थापयेद् विधिवदग्निं होमं कुर्यादनन्तरम् ॥९६॥

एककुण्डे ददेन्नित्यं पृथङ्नित्यं समाचरेत् ।
वरुणं च समुद्दिश्य पायसैरक्षतैरपि ॥९७॥

ततस्तिलयवैर्वापि जुहुयाच्च शताहुतीः ।
घृताक्तैर्मधुराक्तैर्वा(?) शुद्धक्षीरैरथापि वा ॥९८॥

ब्रह्माणामिक्षुभिर्वापि पालासैर्वा घृतेन वा ।
लोकेशादीन् तिलयवैर्मारुतानां यवेन तु ॥९९॥

अन्येषां पायसैर्वापि कमलैर्मोदकैरपि ।
विश्वकर्माणमुद्दिश्य कृसरान्नेन पूजयेत् ॥१००॥

पिशाचानां यावकान्नैर्यक्षाणां पिष्टकैरपि ।
भूतानां माषमिश्रेण कलान्नेन यवेन वा ॥ १०१ ॥

९२. ल. –दो.
९३. ल. भगवन्.
९४. दृश्यतां भविष्ये मध्यमपर्वणि २०.१८१.

गव्ययुक्तेन जुहुयादष्टावष्टौ विभागतः ।
एकैकामाहुतिं दद्याद् घृतस्यैव विधानतः ॥ १०२ ॥

[९५]प्रथमे दिवसे कुर्याद्देवतानां च स्थापनम् ।
द्वितीये पूजयेद्देवान् होमं कुर्यादनन्यधीः ॥ १०३ ॥

तृतीये तु बलिं दद्यात् यथाविभवविस्तरैः ।
पातयेद् वसुधारांश्च दिवसस्यावसानके ॥ १०४ ॥

वरुणात्मकाय सूर्याय दद्यादर्घं विभूतये ।
नृत्यगीतादिना रात्रौ नयेद्रात्रिं समन्ततः ॥ १०५ ॥

हविष्यान्नैर्ब्राह्मणांश्च भोजयेदात्मना सह ।
ततः प्रभातसमये यजमानः सपत्नीकः[९६] ॥ १०६ ॥

[९७]कुर्यादब्दैवतैर्मन्त्रैः सर्वौषध्युदकेन तु ।
समूलकुशतोयैश्च मृत्तिकान्तर्गतैस्तथा ॥ १०७ ॥

पद्मषण्डस्य मार्गस्य वल्मीकैश्च[९८] समुद्भवैः (?) ।
गजदन्तोद्धृतैश्चैव[९९] वृक्षमूलगतैस्तथा[१००] ॥
वृषशृङ्गगतैश्चैव[१०१] स्नानं कुर्यादनन्यधीः ॥ १०८ ॥

[१०२]सुरास्त्वेत्यादिभिर्मन्त्रैः पावमानीगतैरपि ।
कुशापमार्जनविधौ सम्यक् स्नानं समाचरेत् ॥ १०९ ॥

पिधाय वासोयुगलं सुगन्धेनानुलेपयेत् ।
विलिखेद् वारुणास्त्रं च तिलकेऽस्त्रविधानवित् ॥

९५. भविष्ये मध्यमपर्वणि २०, १९५.
९६. ल.—त्निकः. ९७. दृश्यतां भविष्ये मध्यमपर्वणि २०. २०७-८.
९८. ल.—कस्य. ९९. ल.—तस्यैव.
१००. ल. —तस्य च. १०१. ल. तस्यैव.
१०२. 'सुरास्त्वामभिषिञ्चन्तु' इत्यादि स्मार्तो मन्त्रः आ. म. ९३. ५१-५७; तथा भविष्ये मध्यमपर्वणि २०. २१२-२२०.

प्रतिष्ठामारभेत् पश्चात् पंचदेवान् प्रणम्य च ।
पूर्ववत्कारयेत्पूजां होमं कुर्याद्यथाविधि ॥ १११ ॥

[१०३]दोग्ध्रीं च कपिलां शुभ्रां जले गामवतारयेत् ।
अभावे त्वेकवर्णां च श्वेतां वा सर्वलक्षणाम् ॥ ११२ ॥

ऐशान्यभिमुखीं धेनुं वत्सहीनां जले न्यसेत् ।
यावद्वै दशहस्तं स्यात्तावदानीय यत्नतः ॥ ११३ ॥

सामगाय ततो दद्यात् प्रतिष्ठासाङ्गहेतवे ।
[१०४]ततो मङ्गलशब्देन वेदघोषपुरःसरम् ॥ ११४ ॥

तडागमुत्सृजेत् पश्चात् चतुःकुशसमन्वितम् ।
अर्घपात्रावृतहस्तन्याय (?) तोयैः प्रयत्नतः ॥ ११५ ॥

बलिदानं ततः कुर्यात् वरुणाय मधुपायसम् ।
[१०५]आदित्याय च गुडान्नं रक्तपुष्पान्वितं ददेत् ॥ ११६ ॥

सोमाय चैव शाल्यन्नं क्षीराज्यदधिसंयुतम् ।
अङ्गारकाय सयवं शाल्यन्नं गुडपूर्वकम् ॥ ११७ ॥

बुधाय पीतकान्नं च निशारक्तं समास(?)कम् ।
बृहस्पतये तथा पीतं श्वेतं शुक्राय वै ददेत् ॥ ११८ ॥

शनैश्चराय बलिं दद्यात् कृष्णमन्नं तथैव च ।
विट्लवणसमायुक्तं कृष्णभक्तं गुडान्वितम् ॥ ११९ ॥

राहवे च तथा कृष्णं केतवे धूम्रकं ददेत् ।
पीतान्नं च तथेन्द्राय अग्नये चापि लोहितम् ॥ १२० ॥

यमाय तिलभक्तं च कृष्णव्रीहिसमन्वितम् ।
निर्ऋतये तथा कृष्णं वरुणायाज्यपायसम् ॥ १२१ ॥

१०३. द्रष्टव्यतां भविष्ये मध्यमपर्वणि. २०.२२२.
१०४. द्रष्टव्यतां भविष्ये मध्यमपर्वणि. २०. २३१b, २३२a.
१०५. द्रष्टव्यता भविष्ये मध्यमपर्वणि २१. ६०-६३.

वायवे चैव धूम्रान्नं कुबेराय च पीतकम् ।
ईशानाय च शुक्लान्नं ब्रह्मणे पीतसंभवम् ॥ १२२ ॥

अनन्ताय तथाश्वेतं ब्रह्मणे पीतसंभवम् ।
दध्यन्नं विष्णवे तु शिवाय च घृतोदनम् ॥ १२३ ॥

विनायकाय रक्तान्नं कमलायै च पीतकम् ।
अम्बिकायै तथा रक्तं [१] "जपापुष्पान्वितं शुभम् ॥ १२४ ॥

कर्पूरगन्धसंयुक्तं च दधिना(?)क्तं सितं भवेत् ।
अथवा चन्दनार्द्रं च गुडनागरकुङ्कुमम् ॥ १२५ ॥

कुशीतेन समाक्रान्तं वनपुष्पैः सुमण्डितम् ।
अथवा दीपसंयुक्तं तल्लोहितबलिर्भवेत् ॥ १२६ ॥

पीतं भवेन्निशारक्तं सेफालीकुसुमान्वितम् ।
धूम्रं भृङ्गराजाक्तं स्यात् सापत्न्याः पुत्रसंयुतम् ॥ १२७ ॥

पुलाकभक्तमन्नं च तथा विट्लवणान्वितम् ।
मरीचसार्षविजया कृष्णपुष्पान्वितं च वा ॥ १२८ ॥

एतत्कृष्णगणं विप्राः प्रदद्यादविचारयन् ।
भूतेभ्यः स्याद् यावकान्नं पायसं विधकर्मणे ॥ १२९ ॥

यावकान्नं च यक्षेभ्यः पिशाचेभ्यः कलान्नकम् ।
संध्यायां प्रीणयेत् सूर्यं वाञ्छलाण्डुकमेव च(?) ॥ १३० ॥

नयेच्च संहितापाठैर्यजमानः सपत्नीकः[१०७] ।
हविष्यान्नं ततो भुक्त्वा शयीत शुद्धशय्यया ॥ १३१ ॥

ततो रात्रौ व्यतीतायां पूर्ववत्सर्वमाचरेत् ।
बलिदानं न कर्तव्यं महास्नानं समाचरेत् ॥
प्रथमं वारिणा स्नानं [१०८]"समुद्रायेति संस्मरन् ॥ १३२ ॥

१०६. ल. यव°. १०७. ल. त्रिकः. १०८. वा. सं. ३८.७.

समुद्रायत्वेति मन्त्रस्य मधुच्छन्दऋषिर्गायत्रीच्छन्दः वरुणोदेवता वारुणस्नाने विनियोगः ।

आप्यायस्वेति मन्त्रस्य नारायण ऋषिर्जगतीच्छन्दः शचीदेवता श्वेताश्वखुर-मृत्तिकास्नाने विनियोगः ।

तथा चत्वरख्याच्च(?)वल्मीकात्तीर्थसङ्गमात् ।
कृष्टोत्थं कुशमूलोत्थं तथा गन्धान्वितं शुभम् ॥ १३३ ॥
पंचपल्लवसंयुक्तं पञ्चरत्नविभूषितम् ।
पंचक्वाथान्वितं कुर्यात् नानाफलसमन्वितम् ॥

आलोड्य कलशे कृत्वा शंनोदेवीति संपठन् ।
आपोहिष्ठेति तिसृभिः वारिणा स्नापयेत्ततः ॥

चेरुपाणीति(?) मन्त्रस्य बलभद्रऋषिर्गायत्रीच्छन्दः वरुणो देवता पंचामृत-स्नाने विनियोगः ।

वरुणगायत्रीं संकीर्त्य पञ्चगव्येन स्नापयेत् ।
पर्वताग्रमृदा चापि कुशमूलमृदा पुनः ॥१३६॥

[१०९]तेजोऽसीति मन्त्रस्य हारीतऋषिर्वायवी देवता घृतस्नाने विनियोगः ।

[११०]दधिक्राव्णो इति मन्त्रस्य नारद ऋषिर्विराट् छन्दः वरुणो देवता दधिस्नाने विनियोगः ।

[१११]आप्यायस्वेति मन्त्रस्य नील ऋषिस्त्रिष्टुप् छन्दः सविता देवता क्षीर-स्नाने विनियोगः ।

[११२]मधुवातेति मन्त्रस्य औतथ्यऋषिर्विराट्च्छन्दो हिरण्यगर्भो देवता मधुस्नाने विनियोगः ।

१०९. वा. सं. २९, ९. ११०. ऋ. वे. ४, ३९, ६.
१११. ऋ. वे. १, ९१, १६. ११२. ऋ. वे. १, ९०, ६.

[११३]सरस्वत्यै भोजमिति(?) नानापुष्पोदकेन तु ।
[११४]अग्न आयाहीति मन्त्रेण स्नापयेत् फलवारिणा ॥१३७॥

कलशैः स्नापयेत् पश्चात् सहस्रेण शतेन च ।
अशक्तौ पंचविंशत्या अयुग्मेनापि धारया ॥१३८॥

अष्टाङ्गार्घेण च ततः शिवसूक्तैरनन्तरम् ।
पादोदकैश्चापि तथा (?) तीर्थतोयैरनन्तरम् ॥१३९॥

[a]क्षीरं कुशाग्रं नीरं च तिलचम्पकचन्दनम् ।
पुष्पदूर्वाक्षतं क्षौद्रमष्टाङ्गोऽर्घः प्रकीर्तितः ॥१४०॥

ततो नीराजनं कुर्यान्नानाविभवविस्तरैः ।
स्वस्तिकं कलशं शङ्खं नन्द्यावर्तं तथोत्पलम् ॥
कललं दर्पणं छत्रं क्रमान्निर्मुञ्छनं चरेत् ॥१४१॥

स्वस्तिकं चन्दनैः कार्यं पङ्कमृत्तिकयाऽपि वा ।
कपिलागोमयैः कार्यं गोपीनां चन्दनैश्च वा ॥१४२॥

कलशं यवपूर्णं तु शंखं शालिमयं तथा ।
नन्द्यावर्तं मलयजमुत्पलं मुद्गसंभवम् ॥१४३॥

कललं माषसंभूतं दर्पणं पिष्टकोद्भवम् ।
छत्रं पुष्पमयं कुर्यात् विश्वानीति च संपठन् ॥१४४॥

क्रमान्निर्मुञ्छनं कुर्याच्चडागोपरि सत्तमाः ।
धूर्वसीति[११५], च मन्त्रेण माषभक्तं निवेदयेत् ॥१४५॥

पुष्पाक्षतं वस्त्रयुग्मं नानालङ्कारमेव च ।
दन्तकाष्ठं ततो दद्यात् यज्ञसूत्रं निवेदयेत् ॥१४६॥

११३. 'सरस्वत्या तेति जाती पुष्पतोयेन स्नापयेत्' इति पाठ. भविष्ये मध्यम-पर्वणि २०-२३६ b.

११४. ऋ. वे. ६, १६, १०.

a. दृश्यतां नित्याचारप्रदीपे द्वितीय भागे पृ. ५२२.

११५. वा. सं. १,८. -धूरसीति' मन्त्रारम्भ. ।

मुकुटं दर्पणं छत्रं तालवृन्तं तथासनम् ।
चतुः समं (?) चन्दनं च दूर्वाक्षतमतः परम् ॥१४७॥

दद्याद्दीपं घृतमयं तथा तिलमयं पुनः ।
शतमष्टोत्तरं दद्यात्तदर्धं पंचविंशकम् ॥१४८॥

स्थण्डिलस्योत्तरे भागे त्रिहस्तान्तरतस्ततः ।
प्राङ्मने न्यस्य चैशान्यां मण्डपस्य तथाग्रतः ॥१४९॥

[११६]सहकारस्य बिल्वस्य शालस्य च वटस्य च ।
पटेऽपि धापयेद्धूपं [११७]पिलुशय्यामयेऽपि वा ॥१५०॥

निधाय तत्र यूपं च पूर्वाग्रं स्याद्यथाविधि ।
यजमानप्रमाणै(ण) कं यूपं चैवापरं न्यसेत् ॥१५१॥

धातक्याः खदिरस्य स्यात् शालस्य केशरस्य वा ।
संस्थापयेत् फलधिया यूपं रक्षेति संस्मरन् ।
खनित्वा रोपयेत् यूपं हस्तं दत्वा पठेत् पुनः ॥१५२॥

नौकामारोहयेत् पश्चाद् यूपमादाय वाग्यतः ।
मध्यदेशे तडागस्य किंचिदुत्तरगोचरे ॥१५३॥

गर्तं प्रकल्प्य तत्रैव आप्यायस्वेति कीर्तयन् ।
घृताहुतित्रयं दद्यात् स्वाहेति अच्युताय वै[११८] ॥१५४॥

यूपगर्तं तु विधिवत् भौमाय तदनन्तरम् ।
लाजासक्तो(सक्तू?)दनं दध्ना 'कूर्माय' तदनन्तरम् ॥१५५॥

पृथिव्यै नमः स्वाहेति दद्यादर्घमनन्तरम् ।
चतूरज्जूसुसम्बद्धं प्रापयेन्मन्त्रसंयुतम् ॥१५६॥

११६. द्रष्टव्यं भविष्ये मध्यमपर्वणि २-अंश २० अध्याय श्लो. २६२-२७३.
११७. ल. पीलु° प्रसूनमित्यर्थः ।
११८. ल. अक्षता यवैः

[११९]स्थिरो भवेति मन्त्रेण गन्धमाल्यैः प्रपूजयेत् ।
चक्रं सुदर्शनं शङ्खं नागदन्तशिरोगतम् ॥१५७॥

विघ्नस्यात्र च कर्तारं जहि दुःखं हरिप्रिय ।
एवं प्रपूजयेच्चक्रं गदामन्त्रमुदाहरेत् ॥१५८॥

[१२०]यज्ञप्रियासि देवि त्वं सर्वविघ्नविनाशिनी ।
त्राहि मां सर्वपापेभ्यो ह्यासने त्वं स्थिरा भव ॥१५९॥

दद्याच्चक्रं कांस्यमयमथवा वैत्य(?)[१२१]सम्भवम् ।
अष्टतोलकमानेन चतुरङ्गुलविस्तृतम् ॥१६०॥

अङ्गुलैकं भवेदायं(?)न लौहैः कारयेत् कलौ ।
उच्चैर्ध्वजं ततो दद्यात् पताकायुतमेव वा ॥१६१॥

पुष्पमालान्वितं कुर्याद् वस्त्रेण परिवेष्टयेत् ।
प्राप्तितेन स्पृशेद् यत्ते(?)स्पृष्ट्वाचम्य हरिं स्मरेत् ॥१६२॥

[१२२]सर्पाकारं तडागे च पुष्करिण्यां तथैव च ।
शूलाकारं च प्रासादे विष्णुपक्षे गदाकृतिः ॥ १६३ ॥

सेतौ कुम्भाकृतिश्चैव आरामे कमलाकृतिः ।
छत्राकृतिर्मण्डपे च गोयागे तु वृषाकृतिः ॥ १६४ ॥

लक्षहोमेऽङ्कुशाकारं ग्रहयागे नराकृतिः ।
अश्वाकृतिरश्वमेधे राजसूये ध्वजाकृतिः ॥ १६५ ॥

कोटिहोमे गदाकारमयुते पद्मसन्निभम् ।
अब्दैवतैः शान्तिकैश्च पावमान्यैश्च सर्वशः ॥१६६॥

ग्रहाभिधानैर्दिक्पालैरपामार्जनकैरपि ।
कुण्डस्योदकमानीय यजमानं सपत्नीकम् ॥१६७॥

११९. वा. सं. ११, ४४ १२० भविष्ये मध्यमपर्वणि २१, ११०.
१२१ ल. वैह्य (?)
१२२. दृश्यतां भविष्ये मध्यमपर्वणि १०, १९-२२a-b

स्नापयेद्विधिनानेन प्रदद्यादथ दक्षिणाम् ।
अष्टादशसुवर्णं च प्रतिष्ठायां विधीयते ॥१६८॥

तदर्धं च तदर्धं च वित्तशाठ्यं न कारयेत् ।
परितोषं दक्षिणान्ते तदन्ते दानमेव च ॥१६९॥

सर्वान्ते चैव पूर्णां च सवित्रेऽर्घं निवेदयेत् ।
वेष्टयेत् पुष्करिण्यां च जलक्षीरमयेन च ॥१७०॥

एवं प्रदक्षिणं कुर्यात् सहस्रशतधारया ।
वेष्टयेत् पञ्चगव्येन ततो [१२३]लाजाकपर्दकान् ॥ १७१ ॥

निर्वपेत्सर्वतश्चापि ब्रह्मघोषरवेण च ।
गृहं प्रविश्य च पुनरिष्टदेवं समर्चयेत् ॥ १७२ ॥

गृहदेवीं कुबेरं च बन्धुवर्गान् च भोजयेत् ।
पूजयेद् गुरुपत्नीं च ब्राह्मणांश्च विशेषतः ॥ १७३ ॥

यज्ञोपकरणं द्रव्यं नैवेद्यादीनि सत्तमाः ।
आचार्यानुज्ञामादाय यूपशय्यां निवेदयेत् ॥ १७४ ॥

दक्षिणातो बहिः सर्वं सर्वसत्त्वेभ्य उत्सृजेत् ।
दीनानां च दरिद्राणां पाषण्डानां विधानवित् ॥

इति स्वल्पमत्स्यपुराणे षट्पादकार्यासाहस्रे
प्रतिष्ठाविधौ अष्टादशोऽध्यायः ॥

१२३. ल. लाज

PUBLICATIONS RECEIVED

BOOKS

1. La Grammaire De Pāṇini 2 Volumes
   Par Louis Renou Membre de 1' Institute Published by Ecola Francaise D 'Extreme–Orient Paris, 1966.
2. Veda Śāstra Saṅgrahaḥ (Sāhitya Ratnākara Part I)
   An Anthology of the Vedas, Upaniṣadas and Śāstras Ed. Visva Bandhu, Pub. Sahitya Academi, New Delhi 1966.
3. Viveka-Candrodaya Nāṭaka of Siva Kavi
   Ed. K. V. Sarma, Pub. Vishveshvarananda Institute Hosiarpur, 1966.
4. Praśasti-Kāśikā of Bālakṛṣṇa Tripathi
   (A work on the technique of letter-writing in Medieval India). Critically edited with Introduction by K. V. Sarma, Pub. Vishveshvaranand Institute Hosiarpur 1967.
5. Loka-Vibhāga of Śri Simhasūraiṣi
   (A Text on Jaina cosmography etc.) Ed. Pt. Balchandra Siddhanta Shastri; Pub. Gulabchand Hirachand-Doshi Jaina Samskrit Samrakṣaka Sangha, Sholapur, 1962.

PERIODICAL AND JOURNALS

1. Bulletin of the School of Oriental And African Studies, University of London, Vol. XXX Post 1, 1967.
2. Contemporary Review, Vol. 210 No. 1215, April, 1967.
3. Wiener Zeitschrift Für Die
   Kunde Süd—Und Ostasiens Und Archiv Für Indische Philosophie Band VIII 1964 Für Das Indologische Institute Der Universitate Wien.
4. East & West, Journal of the Institute Stalians Per Il Medis Ed Estremo Oriento, Is Mew. Vol. 16 Nos. 1—2 March-June 1966.
5. Scopus, Journal of Hebrew University of Jerusalam, Vol. 20, No. 2, June, 1966.
6. Sümer, A Journal of Archaeology and History of Iraq, Vol. XXI, No. 1—2, 1965.
   The Directorate General of Antiquities, Republic of Iraq Baghdad.

7. The Journal of the Siam Society, Vol. LIII Part 1. Bangkok, Thailand, January 1965.

8. Journal of Indian And Buddhist Studies, Vol. XIV No. 2 Japanese Association of Indian and Buddhist Studies Dept. of Indian philosophy and Sanskrit Philology Faculty of Letters, University of Tokyo, Japan.

9. Encounter Vol. XXVIII No. 5 May 1967.

10. Archiv Orientalni 34/2 1966
Orientalni Ustav Lezenska 4 Academia Preha 1 ezechoslovakia. (The Journal of the Oriental Institute of the Czechoslovak Academy of Science in Prague).

11. Bulletin of the Deccan College Research Institute, Poona Silver Jubilee Volume, June, 15, 1966.

12. Annals of the Bhandarkar Oriental Research Institute Vol. LVI, parts 1-4, 30.4.1966. Poona.

13. Journal of the Oriental Institute, M.S. University of Baroda. Vol. XVI, No. 2 December 1966.

14. Vishveshvarananda Indological Journal, Vol. V Pt. 1. March 1967. Pub. Vishveshvarananda Institute of Sanskrit and Indological Studies Panjab University, P. O. Sadhu Ashram, Hosiarpur.

15. Our Heritage, Bulletin of the Dept. of Post-Graduate Training and Research, Sanskrit College Calcutta, Vol. XIV, Part I, January-June, 1966.

16. Bulletin of the Prince of Wales Museum of Western India, No. 9, 1964-1966 Bombay.

17. Bhāratīya Vidyā, A Quarterly Research Bulletin of Bharatiya Vidya Bhavan Bombay 7. Vol. XXV : Nos. 3-4, September 1966.

18. Brahma Vidyā, The Adyar Library Bulletin, Vol. XXIX Pt. 1-4 Madras 20, 1965.

19. The Viśva Bhāratī Quarterly of Santiniketan, West Bengal, Vol. 31 No. 1, 1965-66.

20. प्रज्ञा, Banaras Hindu University Journal, Vol. XII (1) Oct. 1966.

सारस्वती सुषमा (Sanskrit) Vārāṇaseya Sanskrit University Journal.

The Journal of Oriental Research Madras, India. The Kuppuswami Sastri Research Institute, Mylopore, Madras-4.

Śāradā Pīṭha Pradīpa, A Bi-Annual Journal of Indological Research Institute, Dwaraka, Vol. No. 2 August 1956.

Journal of Asiatic Society, Asiatic Society Park Street, Calcutta.

Guide to Indian Periodical Literature, Prabhu Book Service Gurgaon (Haryana) India.

विश्वज्योति (राष्ट्ररक्षा अंक) March, 1967 Sadhu Ashram, Hosiarpur.

Yoga-Mīmāṁsā, A quarterly Journal Vol. IX, No. 4 April 1967, Kaivalya Dhama, Lonavala (C. R.) Maharastra, India.

Bulletin of the Ramkrishna Mission Institute of Culture, Vol. XVIII, No. 4-7 Gol Park Calcutta May & July 1967.

Darshan International, An International Quarterly, Vol. VI No. 4. October 1967 Moradabad, India.

The Advent, A quarterly, Vol. XXIII No. 2, April 1966, Sri Aurobindo Ashram, Pondicheri, India.

The Indo-Asian culture Vol. XV No. 2 April 1966, Indian Council for Cultural Relations, Azad Bhavan, Indraprasth Estate, New Delhi.

Bulletin of Government Oriental Manuscripts Library Madras.

सविता (A Vedic Monthly), edited by Sri Abhaya Deva M.A., Veda Saṁsthāna, Ajmer, Rajasthan.

आर्यशास्त्र (A Bengali Periodical, Calcutta). Year V, Magh 1373 BS, Jaishtha 1374 BS. (Jan.-Feb., and May-June 1967).

Parkh, A Research Bulletin in Panjabi Language and Literature Panjab University Chandigarh, Editor Dr. S. S. Kohli Prof. Panjabi Dept. 1966.

Sri Ravi Varma Sanskrit Granthavali (Quarterly) Pub. The Sanskrit College Committee Tripunthura.

कल्याण, Gita Press Gorakhpur.

Bhavan's Journal (in English) Bharatiya Vidya Bhavan Bombay.

THE VĀMANA PURĀṆA

Critically edited for the first time on the basis of the 20 Manuscripts of different versions. Contains Introduction, Constituted Text, Critical Apparatus giving variants or pāṭhāntaras, Critical Notes, several useful Appendices and an Alphabetical Index of ślokārdhas or half-ślokas.

Editor

A. S. Gupta

Price Rs. 125/-

VĀMANA PURĀṆA

Reconstituted Text with **English Translation** and the Appendices and Indices. [In Press]

Reconstituted Text with **Hindi Translation** and Appendices and Indices. [In Press]

Published by

The All-India Kashiraj Trust
Fort, Ramnagar, Varanasi (India)

THE BOARD OF TRUSTEES

OF

THE ALL-INDIA KASHIRAJ TRUST

1. His Highness Maharaja Dr. Vibhuti Narain Singh, M.A.,D.Litt., Fort Ramnagar, Varanasi.—(*Chairman*).

Trustee nominated by the Govt. of India :—

2. Vacant.

Trustees nominated by the Govt. of Uttar Pradesh :—

3. Dr. Sampurnanand, D. Litt.

4. Pt. Kamalapati Tripathi.

Trustees nominated by His Highness the Maharaja of Banaras :—

5. Dr. Suniti Kumar Chatterji, M.A., D. Litt. (London), F. A. S. B., Professor Emeritus of Comparative Philology in the University of Calcutta; National Professor of India.

6. Maharaj-kumar Dr. Raghubir Singh, M. A., D. Litt.; Raghubir Niwas, Sitamau (Malwa).

7. Pt. Giridhari Lal Mehta, Varanasi; Managing Director: Jardine Handerson Ltd., the Scindia Steam Navigation Ltd; Trustee: Vallabh Ram Saligram Trust, Calcutta.

The '*Purāṇa*' Bulletin has been started by the Purāṇa Department of the All-India Kashiraj Trust with the aim of organising the manifold studies relating to the Purāṇas. It specially discusses the several aspects of text-reconstruction, of the interpretation of the vast cultural and historical material, and of the obscure esoteric symbolism of legends and myths of the Purāṇas. The editors invite contributions from all those scholars who are interested in the culture of the Purāṇa literature in which the religion and philosophy of the Vedas have found the fullest expression.

Statement of ownership and other particulars about

पुराणम्—PURĀṆA

1. Place of Publication ... Fort, Ramnagar, Varanasi.
2. Periodicity of Publication ... Half-yearly
3. Printer's Name ... Rama Shanker
   Nationality ... Indian
   Address ... The Tara Printing Works, Kamachha, Varanasi
4. Publisher's Name ... Ramesh Chandra De, General Secretary, All-India Kashiraj Trust
   Nationality ... Indian
   Address ... All-India Kashiraj Trust, Fort Ramnagar, Varanasi.
5. Editors' Names with Address ... Rajeshwar Sastri Dravid (Sāṅga-Veda Vidyālaya, Varanasi), V. Raghavan (Madras Universiiy), L. Sternbach, United Nations (New York), A. S. Gupta (*Editor-in-Charge*) (Purāṇa Deptt., Fort Ramnagar, Varanasi)
   Nationality ... Indian, and American (L. Sternbach)
6. Name of the owner ... All-India Kashiraj Trust, Fort Ramnagar, Varanasi.

I, Ramesh Chandra De, hereby declare that the particulars given above are true to the best of my knowledge and belief.

Ramesh Chandra De
Publisher.